(१९२)

त्वम् अ॑ग्ने॒ द्यु॒भि॒स् त्वम् आ॑शुशु॒क्षणि॒स् त्वम् अ॒द्भ्य॒स् त्वम् अश्म॑न॒स् परि॑ ।
त्वं वने॑भ्य॒स् त्वम् ओष॑धीभ्य॒स् त्वं नृ॒णां नृ॑पते जायसे॒ शुचिः॑ ॥ २ ००१ ०१
तवा॑ग्ने हो॒त्रं तव॑ पो॒त्रम् ऋ॒त्वियं॒ तव॑ ने॒ष्ट्रं त्वम् अ॒ग्निद् ऋ॑ता॒यतः ।
त्वं वने॑भ्य॒स् त्वम् ओष॑धीभ्य॒स् त्वं नृ॒णां नृ॑पते जायसे॒ शुचिः॑ ॥ २ ००१ ०१
तव॑ प्रशा॒स्त्रं त्वम् अ॑ध्वरीयसि ब्र॒ह्मा चासि॑ गृ॒हप॑तिश् च नो॒ दमे॑ ॥ २ ००१ ०२
त्वम् अ॑ग्न॒ इन्द्रो॑ वृष॒भः स॒ताम् अ॑सि॒ त्वं विष्णु॑र् उरुगा॒यो न॑म॒स्यः ।
त्वम् ब्र॒ह्मा र॑यि॒विद् ब्र॑ह्मणस् पते॒ त्वं वि॑ध॒र्तः सचसे॒ पुरं॑ध्या ॥ २ ००१ ०३
त्वम् अ॑ग्ने॒ राजा॒ वरु॑णो धृ॒तव्र॑त॒स् त्वम् मि॒त्रो भ॑वसि द॒स्म ईड्यः॑ ।
त्वम् अ॑र्य॒मा सत्प॑ति॒र् यस्य॑ स॒म्भुजं॒ त्वम् अंशो॑ वि॒दथे॑ देव भाज॒युः ॥ २ ००१ ०४
त्वम् अ॑ग्ने॒ त्वष्टा॑ विध॒ते सु॒वीर्यं॒ तव॒ ग्नावो॑ मित्रमहः सजा॒त्यम् ।
त्वम् आ॑शु॒हेमा॑ ररि॒षे स्वश्व्यं॒ त्वं न॒रां शर्धो॑ असि पुरू॒वसुः॑ ॥ २ ००१ ०५
त्वम् अ॑ग्ने रु॒द्रो असु॑रो म॒हो दि॒वस् त्वं शर्धो॒ मारु॑तम् पृ॒क्ष ई॑शिषे ।
त्वं वातै॑र् अरु॒णैर् या॑सि शंग॒यस् त्वम् पू॒षा वि॑ध॒तः पा॑सि॒ नु त्मना॑ ॥ २ ००१ ०६
त्वम् अ॑ग्ने द्रविणो॒दा अ॑रंकृ॒ते त्वं दे॒वः स॑विता र॑त्न॒धा अ॑सि ।
त्वम् भगो॑ नृपते॒ वस्व॑ ईशिषे॒ त्वम् पा॒युर् द॒मे यस् ते ऽवि॑धत् ॥ २ ००१ ०७
त्वाम् अ॑ग्ने॒ दम॒ आ वि॒श्पतिं॑ वि॒शस् त्वां राजा॑नं सुवि॒दत्र॑म् ऋञ्जते ।
त्वं विश्वा॑नि स्वनीक पत्यसे॒ त्वं स॒हस्रा॑णि श॒ता द॒श प्रति॑ ॥ २ ००१ ०८
त्वाम् अ॑ग्ने पि॒तर॑म् इ॒ष्टिभि॒र् नर॒स् त्वाम् भ्रा॒त्राय॒ शम्या॑ तनू॒रुच॑म् ।
त्वम् पु॒त्रो भ॑वसि॒ यस् ते ऽवि॑ध॒त् त्वं सखा॑ सु॒शेवः॑ पास्य् आ॒धृषः॑ ॥ २ ००१ ०९
त्वम् अ॑ग्न ऋ॒भुर् आ॒के न॑म॒स्य १॒ स् त्वं वाज॑स्य क्षु॒मतो॑ रा॒य ई॑शिषे ।
त्वं वि भा॒स्य् अनु॑ दक्षि दा॒वने॒ त्वं वि॒शिक्षु॑र् असि य॒ज्ञम् आ॒तनिः॑ ॥ २ ००१ १०
त्वम् अ॑ग्ने॒ अदि॑तिर् देव दा॒शुषे॒ त्वं हो॒त्रा भार॑ती वर्धसे गि॒रा ।
त्वम् इळा॑ श॒तहि॑मासि द॒क्षसे॒ त्वं वृ॑त्र॒हा व॑सुपते॒ सर॑स्वती ॥ २ ००१ ११
त्वम् अ॑ग्ने॒ सुभृ॑त उत्त॒मं वय॒स् तव॑ स्पा॒र्हे वर्ण॒ आ सं॒दृशि॒ श्रियः॑ ।
त्वं वाजः॑ प्र॒तर॑णो बृ॒हन्न् अ॑सि॒ त्वं र॒यिर् ब॑हु॒लो वि॒श्वत॑स् पृ॒थुः ॥ २ ००१ १२
त्वाम् अ॑ग्न आ॒दित्यास॑ आ॒स्य १॒॑ त्वां जि॒ह्वां शुच॑यश् चक्रिरे कवे ।

त्वां रा॑ति॒षाचो॑ अध्व॒रेषु॑ सश्चिरे॒ त्वे दे॒वा ह॒विर् अ॑द॒न्त्य् आहु॒॑तम् ॥ २ ००१ १३
त्वे अ॑ग्ने॒ विश्वे॑ अ॒मृता॑सो अ॒द्रुह॑ आ॒सा दे॒वा ह॒विर् अ॑द॒न्त्य् आहु॒॑तम् ।
त्वया॒ मर्ता॑सः स्वदन्त आसु॒तिं त्वं गर्भो॑ वी॒रुधा॑ं जज्ञिषे॒ शुचि॑ः ॥ २ ००१ १४
त्वं तान् सं च॒ प्रति॑ चासि म॒ज्मनाग्ने॑ सुजात॒ प्र च॑ देव रिच्यसे ।
पृ॒क्षो यद् अत्र॑ महि॒ना वि ते॒ भुव॒द् अनु॒ द्यावा॑पृथि॒वी रोद॑सी उ॒भे ॥ २ ००१ १५
ये स्तो॒तृभ्यो॒ गोअ॑ग्रा॒म् अश्व॑पेशस॒म् अग्ने॑ रा॒तिम् उ॑पसृ॒जन्ति॑ सू॒रयः॑ ।
अ॒स्माञ् च॒ तांश् च॒ प्र हि नेषि॒ वस्य॒ आ बृ॒हद् व॑देम वि॒दथे॑ सु॒वीराः॑ ॥ २ ००१ १६

(१९३)
य॒ज्ञेन॑ वर्धत जा॒तवे॑दसम् अ॒ग्निं य॑जध्वं ह॒विषा॒ तना॑ गि॒रा ।
स॒मि॒धा॒नं सु॒प्रय॒सं स्व॑र्णरं द्यु॒क्षं होता॑रं वृ॒जने॑षु धू॒र्षद॑म् ॥ २ ००२ ०१
अ॒भि त्वा॒ नक्ती॑र् उ॒षसो॑ ववाशि॒रे ऽग्ने॑ व॒त्सं न स्वस॑रेषु धे॒नवः॑ ।
दि॒व इ॒वेद् अ॑र॒तिर् मानु॑षा यु॒गा क्षपो॑ भासि पुरुवार सं॒यतः॑ ॥ २ ००२ ०२
तं दे॒वा बु॒ध्ने रज॑सः सु॒दंस॑सं दि॒वस्पृ॑थि॒व्योर् अ॑र॒तिं न्य् ए॑रिरे ।
रथ॑म् इ॒व वेद्यं॑ शु॒क्रशो॑चिषम् अ॒ग्निम् मि॒त्रं न क्षि॒तिषु॑ प्र॒शंस्य॑म् ॥ २ ००२ ०३
तम् उ॒क्षमा॑णं रज॑सि॒ स्व आ दमे॑ च॒न्द्रम् इ॑व सु॒रुचं॑ ह्वा॒र आ द॑धुः ।
पृश्न्याः॑ पत॒रं चि॒तय॑न्तम् अ॒क्षभिः॑ पा॒थो न पा॒युं जन॑सी उ॒भे अनु॑ ॥ २ ००२ ०४
स होता॒ विश्व॒म् परि॑ भूत्व् अध्व॒रं तम् उ॑ ह॒व्यैर् मनु॑ष ऋञ्जते गि॒रा ।
हि॒रि॒शि॒प्रो वृ॑धसा॒नासु॒ जर्भु॑र॒द् द्यौर् न स्तृभि॑श् चितय॒द् रोद॑सी॒ अनु॑ ॥ २ ००२ ०५
स नो॑ रे॒वत् स॑मिधा॒नः स्व॒स्तये॑ संददस्वान् र॒यिम् अ॒स्मासु॑ दीदिहि ।
आ नः॑ कृणुष्व सुवि॒ताय॒ रोद॑सी॒ अग्ने॑ ह॒व्या मनु॑षो देव वी॒तये॑ ॥ २ ००२ ०६
दा नो॑ अग्ने बृह॒तो दाः स॑ह॒स्रिणो॑ दु॒रो न वाजं॒ श्रुत्या॒ अपा॑ वृधि ।
प्राची॒ द्यावा॑पृथि॒वी ब्रह्म॑णा कृधि॒ स्व १॒ र् ण शु॒क्रम् उ॒षसो॒ वि दि॑द्युतः ॥ २ ००२ ०७
स इ॑धा॒न उ॒षसो॒ राम्या॒ अनु॒ स्व १॒ र् ण दी॑दे॒द् अ॑रु॒षेण॑ भा॒नुना॑ ।
होत्रा॑भिर् अ॒ग्निर् मनु॑षः स्वध्व॒रो राजा॑ वि॒शाम् अति॑थि॒श् चारु॑र् आ॒यवे॑ ॥ २ ००२ ०८
ए॒वा नो॑ अग्ने अ॒मृते॑षु पूर्व्य॒ धीष् पी॑पाय बृ॒हद्दि॑वेषु॒ मानु॑षा ।

दुहाना धेनुर् वृजनेषु कारवे त्मना शतिनम् पुरुरूपम् इषणि ॥ २ ००२ ०९
वयम् अग्ने अर्वता वा सुवीर्यम् ब्रह्मणा वा चितयेमा जनाँ अति ।
अस्माकं द्युम्नम् अधि पञ्च कृष्टिषूच्चा स्व१र् ण शुशुचीत दुष्टरम् ॥ २ ००२ १०
स नो बोधि सहस्य प्रशंस्यो यस्मिन् सुजाता इषयन्त सूरयः ।
यम् अग्ने यज्ञम् उपयन्ति वाजिनो नित्ये तोके दीदिवांसं स्वे दमे ॥ २ ००२ ११
उभयासो जातवेदः स्याम ते स्तोतारो अग्ने सूरयश् च शर्मणि ।
वस्वो रायः पुरुश्चन्द्रस्य भूयसः प्रजावतः स्वपत्यस्य शग्धि नः ॥ २ ००२ १२
ये स्तोतृभ्यो गोअग्राम् अश्वपेशसम् अग्ने रातिम् उपसृजन्ति सूरयः ।
अस्माञ् च तांश् च प्र हि नेषि वस्य आ बृहद् वदेम विदथे सुवीराः ॥ २ ००२ १३

(१९४)
समिद्धो अग्निर् निहितः पृथिव्याम् प्रत्यङ् विश्वानि भुवनान्य् अस्थात् ।
होता पावकः प्रदिवः सुमेधा देवो देवान् यजत्व् अग्निर् अर्हन् ॥ २ ००३ ०१
नराशंसः प्रति धामान्य् अञ्जन् तिस्रो दिवः प्रति मह्ना स्वर्चिः ।
घृतप्रुषा मनसा हव्यम् उन्दन् मूर्धन् यज्ञस्य सम् अनक्तु देवान् ॥ २ ००३ ०२
ईळितो अग्ने मनसा नो अर्हन् देवान् यक्षि मानुषात् पूर्वो अद्य ।
स आ वह मरुतां शर्धो अच्युतम् इन्द्रं नरो बर्हिषदं यजध्वम् ॥ २ ००३ ०३
देव बर्हिर् वर्धमानं सुवीरं स्तीर्णं राये सुभरं वेद्य् अस्याम् ।
घृतेनाक्तं वसवः सीदतेदं विश्वे देवा आदित्या यज्ञियासः ॥ २ ००३ ०४
वि श्रयन्ताम् उर्विया हूयमाना द्वारो देवीः सुप्रायणा नमोभिः ।
व्यचस्वतीर् वि प्रथन्ताम् अजुर्या वर्णम् पुनाना यशसं सुवीरम् ॥ २ ००३ ०५
साध्व् अपांसि सनता न उक्षिते उषासानक्ता वय्येव रण्विते ।
तन्तुं ततं संवयन्ती समीची यज्ञस्य पेशः सुदुघे पयस्वती ॥ २ ००३ ०६
दैव्या होतारा प्रथमा विदुष्टर ऋजु यक्षतः सम् ऋचा वपुष्टरा ।
देवान् यजन्ताव् ऋतुथा सम् अञ्जतो नाभा पृथिव्या अधि सानुषु त्रिषु ॥ २ ००३ ०७
सरस्वती साधयन्ती धियं न इळा देवी भारती विश्वतूर्तिः ।
तिस्रो देवीः स्वधया बर्हिर् एदम् अच्छिद्रम् पान्तु शरणं निषद्य ॥ २ ००३ ०८

पि॒शङ्ग॑रूपः सु॒भरो॑ वयो॒धाः श्रु॒ष्टी वी॒रो जा॑यते दे॒वका॑मः ।
प्र॒जां त्वष्टा॒ वि ष्य॑तु॒ नाभि॑म् अ॒स्मे अथा॑ दे॒वाना॒म् अप्य् ए॑तु॒ पाथः॑ ॥ २ ००३ ०९
वन॒स्पति॑र् अवसृ॒जन्न् उप॑ स्थाद् अ॒ग्निर् ह॒विः सू॑दयाति॒ प्र धी॒भिः ।
त्रि॒धा सम॑क्तं नयतु प्रजा॒नन् दे॒वेभ्यो॒ दैव्यः॑ शमि॒तोप॑ ह॒व्यम् ॥ २ ००३ १०
घृतम् मि॑मिक्षे घृतम् अ॑स्य॒ योनि॑र् घृते श्रि॒तो घृतम् व् अ॑स्य॒ धाम॑ ।
अ॒नु॒ष्व॒धम् आ व॑ह मा॒दय॑स्व॒ स्वाहा॑कृतं वृषभ वक्षि ह॒व्यम् ॥ २ ००३ ११

(१९५)
हु॒वे वः॑ सु॒द्योत्मा॑नं सु॒वृक्तिं॑ वि॒शाम् अ॒ग्निम् अति॑थिं सु॒प्रय॑सम् ।
मि॒त्र इ॑व॒ यो दि॑धि॒षाय्यो॒ भूद् दे॒व आदे॑वे॒ जने॑ जा॒तवे॑दाः ॥ २ ००४ ०१
इ॒मं वि॒धन्तो॑ अ॒पां स॒धस्थे॑ द्वि॒ताद॑धु॒र् भृग॑वो वि॒क्ष्व् आ ३॑ योः ।
ए॒ष विश्वा॑न्य् अ॒भ्य् अस्तु॒ भूमा॑ दे॒वाना॑म् अ॒ग्निर् अ॑र॒तिर् जी॒राश्वः॑ ॥ २ ००४ ०२
अ॒ग्निं दे॒वासो॒ मानु॑षीषु वि॒क्षु प्रि॒यं धुः॑ क्षे॒ष्यन्तो॒ न मि॒त्रम् ।
स दी॑दयद् उश॒तीर् ऊर्म्या॒ आ द॒क्षाय्यो॒ यो दास्व॑ते॒ दम॒ आ ॥ २ ००४ ०३
अ॒स्य र॒ण्वा स्वस्ये॑व पु॒ष्टिः संदृ॑ष्टिर् अ॒स्य हि॑या॒नस्य॒ दक्षोः॑ ।
वि यो भरि॑भ्रद् ओष॑धीषु जि॒ह्वाम् अत्यो॒ न रथ्यो॑ दोधवीति॒ वारा॑न् ॥ २ ००४ ०४
आ यन् मे॒ अभ्वं॑ व॒नदः॒ पन॑न्तोशि॒ग्भ्यो॒ नामि॑मीत॒ वर्ण॑म् ।
स चि॒त्रेण॑ चिकिते॒ रंसु॑ भा॒सा जु॑जु॒र्वाँ॒॑ यो मुहु॒र् आ युवा॒ भूत् ॥ २ ००४ ०५
आ यो वना॑ तातृषा॒णो न भाति॒ वार् ण प॒था रथ्ये॑व स्वानीत् ।
कृ॒ष्णाध्वा॒ तपू॑ र॒ण्वश् चि॑केत॒ द्यौर् इ॑व॒ स्मय॑मानो॒ नभो॑भिः ॥ २ ००४ ०६
स यो व्य् अस्था॑द् अ॒भि दक्ष॑द् उ॒र्वीम् प॒शुर् नैति॑ स्व॒युर् अगो॑पाः ।
अ॒ग्निः शो॒चिष्माँ॑ अत॒सान्य् उ॒ष्णन् कृ॒ष्णव्य॑थिर् अस्वदय॒न् न भूम॑ ॥ २ ००४ ०७
नू ते॒ पूर्व॒स्याव॑सो॒ अधी॑तौ तृ॒तीये॑ वि॒दथे॒ मन्म॑ शंसि ।
अ॒स्मे अ॑ग्ने सं॒यद्वी॑रम् बृ॒हन्तं॑ क्षु॒मन्तं॒ वाजं॑ स्वप॒त्यं र॒यिं दाः॑ ॥ २ ००४ ०८
त्वया॒ यथा॑ गृत्सम॒दासो॑ अग्ने॒ गुहा॑ व॒न्वन्त॒ उप॑राँ अ॒भि ष्युः ।
सु॒वीरा॑सो अभिमाति॒षाहः॒ स्मत् सू॒रिभ्यो॑ गृण॒ते तद् वयो॑ धाः ॥ २ ००४ ०९

(१९६)
होताजनिष्ट चेतनः पिता पितृभ्य ऊतये ।
प्रयक्षञ् जेन्यं वसु शकेम वाजिनो यमम् ॥ २ ००५ ०१
आ यस्मिन् सप्त रश्मयस् तता यज्ञस्य नेतरि ।
मनुष्वद् दैव्यम् अष्टमम् पोता विश्वं तद् इन्वति ॥ २ ००५ ०२
दधन्वे वा यद् ईम् अनु वोचद् ब्रह्माणि वेर् उ तत् ।
परि विश्वानि काव्या नेमिश् चक्रम् इवाभवत् ॥ २ ००५ ०३
साकं हि शुचिना शुचिः प्रशास्ता क्रतुनाजनि ।
विद्वाँ अस्य व्रता ध्रुवा वया इवानु रोहते ॥ २ ००५ ०४
ता अस्य वर्णम् आयुवो नेष्टुः सचन्त धेनवः ।
कुवित् तिसृभ्य आ वरं स्वसारो या इदं ययुः ॥ २ ००५ ०५
यदी मातुर् उप स्वसा घृतम् भरन्त्य् अस्थित ।
तासाम् अध्वर्युर् आगतौ यवो वृष्टीव मोदते ॥ २ ००५ ०६
स्वः स्वाय धायसे कृणुताम् ऋत्विग् ऋत्विजम् ।
स्तोमं यज्ञं चाद् अरं वनेमा ररिमा वयम् ॥ २ ००५ ०७
यथा विद्वाँ अरं करद् विश्वेभ्यो यजतेभ्यः ।
अयम् अग्ने त्वे अपि यं यज्ञं चकृमा वयम् ॥ २ ००५ ०८

(१९७)
इमाम् मे अग्ने समिधम् इमाम् उपसदं वनेः ।
इमा उ षु श्रुधी गिरः ॥ २ ००६ ०१
अया ते अग्ने विधेमोर्जो नपाद् अश्वमिष्टे ।
एना सूक्तेन सुजात ॥ २ ००६ ०२
तं त्वा गीर्भिर् गिर्वणसं द्रविणस्युं द्रविणोदः ।
सपर्येम सपर्यवः ॥ २ ००६ ०३
स बोधि सूरिर् मघवा वसुपते वसुदावन् ।

युयोध्य् अ१ स्मद् द्वेषांसि ॥ २ ००६ ०४
स नो वृष्टिं दिवस् परि स नो वाजम् अनर्वाणम् ।
स नः सहस्रिणीर् इषः ॥ २ ००६ ०५
ईळानायावस्यवे यविष्ठ दूत नो गिरा ।
यजिष्ठ होतर् आ गहि ॥ २ ००६ ०६
अन्तर् ह्य् अग्न ईयसे विद्वाञ् जन्मोभया कवे ।
दूतो जन्येव मित्र्यः ॥ २ ००६ ०७
स विद्वाँ आ च पिप्रयो यक्षि चिकित्व आनुषक् ।
आ चास्मिन् सत्सि बर्हिषि ॥ २ ००६ ०८

(१९८)
श्रेष्ठं यविष्ठ भारताग्ने द्युमन्तम् आ भर ।
वसो पुरुस्पृहं रयिम् ॥ २ ००७ ०१
मा नो अरातिर् ईशत देवस्य मर्त्यस्य च ।
पर्षि तस्या उत द्विषः ॥ २ ००७ ०२
विश्वा उत त्वया वयं धारा उदन्या इव ।
अति गाहेमहि द्विषः ॥ २ ००७ ०३
शुचिः पावक वन्द्यो ऽग्ने बृहद् वि रोचसे ।
त्वं घृतेभिर् आहुतः ॥ २ ००७ ०४
त्वं नो असि भारताग्ने वशाभिर् उक्षभिः ।
अष्टापदीभिर् आहुतः ॥ २ ००७ ०५
द्रुवन्नः सर्पिरासुतिः प्रत्नो होता वरेण्यः ।
सहसस् पुत्रो अद्भुतः ॥ २ ००७ ०६

(१९९)
वाजयन्न् इव नू रथान् योगाँ अग्नेर् उप स्तुहि ।

यशस्तमस्य मीळ्हुषः ॥ २ ००८ ०१
यः सुनीथो ददाशुषे ऽजुर्यो जरयन्न् अरिम् ।
चारुप्रतीक आहुतः ॥ २ ००८ ०२
य उ श्रिया दमेष्व् आ दोषोषसि प्रशस्यते ।
यस्य व्रतं न मीयते ॥ २ ००८ ०३
आ यः स्व१ र् ण भानुना चित्रो विभात्य् अर्चिषा ।
अञ्जानो अजरैर् अभि ॥ २ ००८ ०४
अत्रिम् अनु स्वराज्यम् अग्निम् उक्थानि वावृधुः ।
विश्वा अधि श्रियो दधे ॥ २ ००८ ०५
अग्नेर् इन्द्रस्य सोमस्य देवानाम् ऊतिभिर् वयम् ।
अरिष्यन्तः सचेमह्य् अभि ष्याम पृतन्यतः ॥ २ ००८ ०६

(२००)

नि होता होतृषदने विदानस् त्वेषो दीदिवाँ असदत् सुदक्षः ।
अदब्धव्रतप्रमतिर् वसिष्ठः सहस्रम्भरः शुचिजिह्वो अग्निः ॥ २ ००९ ०१
त्वं दूतस् त्वम् उ नः परस्पास् त्वं वस्य आ वृषभ प्रणेता ।
अग्ने तोकस्य नस् तने तनूनाम् अप्रयुच्छन् दीद्यद् बोधि गोपाः ॥ २ ००९ ०२
विधेम ते परमे जन्मन्न् अग्ने विधेम स्तोमैर् अवरे सधस्थे ।
यस्माद् योनेर् उदारिथा यजे तम् प्र त्वे हवींषि जुहुरे समिद्धे ॥ २ ००९ ०३
अग्ने यजस्व हविषा यजीयाञ् छ्रुष्टी देष्णम् अभि गृणीहि राधः ।
त्वं ह्य् असि रयिपती रयीणां त्वं शुक्रस्य वचसो मनोता ॥ २ ००९ ०४
उभयं ते न क्षीयते वसव्यं दिवे-दिवे जायमानस्य दस्म ।
कृधि क्षुमन्तं जरितारम् अग्ने कृधि पतिं स्वपत्यस्य रायः ॥ २ ००९ ०५
सैनानीकेन सुविदत्रो अस्मे यष्टा देवाँ आयजिष्ठः स्वस्ति ।
अदब्धो गोपा उत नः परस्पा अग्ने द्युमद् उत रेवद् दिदीहि ॥ २ ००९ ०६

(२०१)

जो॒हूत्रो॑ अ॒ग्निः प्र॑थ॒मः पि॒तेवे॒ळस् प॒दे मनु॑षा॒ यत् समि॑द्धः ।
श्रियं॒ वसा॑नो अ॒मृतो॒ विचे॑ता मर्मृ॒जेन्यः॑ श्रव॒स्य॒ः१ स वा॒जी ॥ २ ०१० ०१
श्रू॒या अ॒ग्निश् चि॒त्रभा॑नु॒र् हव॑म् मे॒ विश्वा॑भिर् गी॒र्भिर् अ॒मृतो॒ विचे॑ताः ।
श्या॒वा रथ॑ं वहतो॒ रोहि॑ता वो॒तारु॒षाह॑ चक्रे॒ विभृ॑त्रः ॥ २ ०१० ०२
उ॒त्ता॒नाया॑म् अजनयन् सुषू॑तम् भुव॑द् अ॒ग्निः पु॑रु॒पेशा॑सु॒ गर्भः॑ ।
शिरि॑णायां चिद् अ॒क्तुना॒ महो॑भि॒र् अप॑रीवृतो वसति॒ प्रचे॑ताः ॥ २ ०१० ०३
जिघ॑र्म्य् अ॒ग्निं ह॒विषा॑ घृ॒तेन॑ प्रतिक्षि॒यन्त॒म् भुव॑नानि॒ विश्वा॑ ।
पृ॒थुं ति॑र॒श्चा वय॑सा बृ॒हन्त॒ं व्यचि॑ष्ठम् अन्नै॑ रभ॒सं दृशा॑नम् ॥ २ ०१० ०४
आ वि॒श्वतः॑ प्र॒त्यञ्च॑ं जिघर्म्य् अ॒र॒क्षसा॒ मन॑सा॒ तज् जु॑षेत ।
मर्य॑श्री स्पृह॒यद्व॑र्णो अ॒ग्निर् नाभि॒मृशे॑ त॒न्वा॒३ जर्भु॑राणः ॥ २ ०१० ०५
ज्ञे॒या भा॒गं स॑हसा॒नो वरे॑ण॒ त्वादू॑तासो मनु॒वद् व॑देम ।
अनू॑नम् अ॒ग्निं जु॒ह्वा॑ वच॒स्या म॑धु॒पृच॑ं धन॒सा जो॑हवीमि ॥ २ ०१० ०६

(२०२)

श्रु॒धी हव॑म् इन्द्र॒ मा रि॑षण्यः॒ स्याम॑ ते दा॒वने॒ वसू॑नाम् ।
इ॒मा हि त्वाम् ऊर्जो॑ व॒र्धय॑न्ति वसू॒यवः॒ सिन्ध॑वो॒ न क्षर॑न्तः ॥ २ ०११ ०१
सृ॒जो म॒हीर् इ॑न्द्र॒ या अपि॑न्वः॒ परि॑ष्ठिता॒ अहि॑ना शूर पू॒र्वीः ।
अम॑र्त्यं चिद् दा॒सम् मन्य॑मान॒म् अवा॑भिनद् उ॒क्थैर् वा॑वृधा॒नः ॥ २ ०११ ०२
उ॒क्थेष्व् इन् नु शू॑र॒ येषु॑ चा॒कन् स्तोमे॑ष्व् इन्द्र रु॒द्रिये॑षु च ।
तुभ्येद् ए॒ता यासु॑ मन्दसा॒नः प्र वा॒यवे॑ सिस्रते॒ न शु॒भ्राः ॥ २ ०११ ०३
शु॒भ्रं नु ते॒ शुष्म॑ं व॒र्धय॑न्तः शु॒भ्रं वज्र॑म् बा॒ह्वोर् दधा॑नाः ।
शु॒भ्रस् त्वम् इ॑न्द्र वावृधा॒नो अ॒स्मे दासी॒र् विशः॒ सूर्ये॑ण सह्याः ॥ २ ०११ ०४
गुहा॑ हि॒तं गुह्य॑ं गू॒ळ्हम् अ॒प्स्व् अपी॑वृतम् मा॒यिन॑ं क्षि॒यन्त॑म् ।
उ॒तो अ॒पो द्यां त॑स्त॒भ्वांस॒म् अह॒न्न् अहि॑ं शूर वी॒र्ये॑ण ॥ २ ०११ ०५
स्तवा॒ नु त॑ इन्द्र पू॒र्व्या म॒हान्य् उ॒त स्त॑वाम॒ नूत॑ना कृ॒तानि॑ ।
स्तवा॒ वज्र॑म् बा॒ह्वोर् उ॒शन्त॒ं स्तवा॒ हरी॒ सूर्य॑स्य के॒तू ॥ २ ०११ ०६

हरी नु त इन्द्र वाजयन्ता घृतश्चुतं स्वारम् अस्वार्ष्टाम् ।
वि समना भूमिर् अप्रथिष्टारंस्त पर्वतश् चित् सरिष्यन् ॥ २ ०११ ०७
नि पर्वतः साद्य् अप्रयुच्छन् सम् मातृभिर् वावशानो अक्रान् ।
दूरे पारे वाणीं वर्धयन्त इन्द्रेषितां धमनिम् पप्रथन् नि ॥ २ ०११ ०८
इन्द्रो महां सिन्धुम् आशयानम् मायाविनं वृत्रम् अस्फुरन् निः ।
अरेजेतां रोदसी भियाने कनिक्रदतो वृष्णो अस्य वज्रात् ॥ २ ०११ ०९
अरोरवीद् वृष्णो अस्य वज्रो ऽमानुषं यन् मानुषो निजूर्वात् ।
नि मायिनो दानवस्य माया अपादयत् पपिवान् सुतस्य ॥ २ ०११ १०
पिबा-पिबेद् इन्द्र शूर सोमम् मन्दन्तु त्वा मन्दिनः सुतासः ।
पृणन्तस् ते कुक्षी वर्धयन्त्व् इत्था सुतः पौर इन्द्रम् आव ॥ २ ०११ ११
त्वे इन्द्राप्य् अभूम विप्रा धियं वनेम ऋतया सपन्तः ।
अवस्यवो धीमहि प्रशस्तिं सद्यस् ते रायो दावने स्याम ॥ २ ०११ १२
स्याम ते त इन्द्र ये त ऊती अवस्यव ऊर्जं वर्धयन्तः ।
शुष्मिन्तमं यं चाकनाम देवास्मे रयिं रासि वीरवन्तम् ॥ २ ०११ १३
रासि क्षयं रासि मित्रम् अस्मे रासि शर्ध इन्द्र मारुतं नः ।
सजोषसो ये च मन्दसानाः प्र वायवः पान्त्य् अग्रणीतिम् ॥ २ ०११ १४
व्यन्त्व् इन् नु येषु मन्दसानस् तृपत् सोमम् पाहि द्रह्यद् इन्द्र ।
अस्मान् सु पृत्स्व् आ तरुत्रावर्धयो द्याम् बृहद्भिर् अर्कैः ॥ २ ०११ १५
बृहन्त इन् नु ये ते तरुत्रोक्थेभिर् वा सुम्नम् आविवासान् ।
स्तृणानासो बर्हिः पस्त्यावत् त्वोता इद् इन्द्र वाजम् अग्मन् ॥ २ ०११ १६
उग्रेष्व् इन् नु शूर मन्दसानस् त्रिकद्रुकेषु पाहि सोमम् इन्द्र ।
प्रदोधुवच् छ्मश्रुषु प्रीणानो याहि हरिभ्यां सुतस्य पीतिम् ॥ २ ०११ १७
धिष्वा शवः शूर येन वृत्रम् अवाभिनद् दानुम् और्णवाभम् ।
अपावृणोर् ज्योतिर् आर्याय नि सव्यतः सादि दस्युर् इन्द्र ॥ २ ०११ १८
सनेम ये त ऊतिभिस् तरन्तो विश्वा स्पृध आर्येण दस्यून् ।
अस्मभ्यं तत् त्वाष्ट्रं विश्वरूपम् अरन्धयः साख्यस्य त्रिताय ॥ २ ०११ १९
अस्य सुवानस्य मन्दिनस् त्रितस्य न्य् अर्बुदं वावृधानो अस्तः ।
अवर्तयत् सूर्यो न चक्रम् भिनद् वलम् इन्द्रो अङ्गिरस्वान् ॥ २ ०११ २०

नूनं सा ते प्रति वरं जरित्रे दुहीयद् इन्द्र दक्षिणा मघोनी ।
शिक्षा स्तोतृभ्यो माति धग् भगो नो बृहद् वदेम विदथे सुवीराः ॥ २ ०११ २१

(२०३)
यो जात एव प्रथमो मनस्वान् देवो देवान् क्रतुना पर्यभूषत् ।
यस्य शुष्माद् रोदसी अभ्यसेतां नृम्णस्य मह्ना स जनास इन्द्रः ॥ २ ०१२ ०१
यः पृथिवीं व्यथमानाम् अदृंहद् यः पर्वतान् प्रकुपिताँ अरम्णात् ।
यो अन्तरिक्षं विममे वरीयो यो द्याम् अस्तभ्नात् स जनास इन्द्रः ॥ २ ०१२ ०२
यो हत्वाहिम् अरिणात् सप्त सिन्धून् यो गा उदाजद् अपधा वलस्य ।
यो अश्मनोर् अन्तर् अग्निं जजान संवृक् समत्सु स जनास इन्द्रः ॥ २ ०१२ ०३
येनेमा विश्वा च्यवना कृतानि यो दासं वर्णम् अधरं गुहाकः ।
श्वघ्नीव यो जिगीवाँ लक्षम् आदद् अर्यः पुष्टानि स जनास इन्द्रः ॥ २ ०१२ ०४
यं स्मा पृच्छन्ति कुह सेति घोरम् उतेम् आहुर् नैषो अस्तीत्य् एनम् ।
सो अर्यः पुष्टीर् विज इवा मिनाति श्रद् अस्मै धत्त स जनास इन्द्रः ॥ २ ०१२ ०५
यो रध्रस्य चोदिता यः कृशस्य यो ब्रह्मणो नाधमानस्य कीरेः ।
युक्तग्राव्णो यो ऽविता सुशिप्रः सुतसोमस्य स जनास इन्द्रः ॥ २ ०१२ ०६
यस्याश्वासः प्रदिशि यस्य गावो यस्य ग्रामा यस्य विश्वे रथासः ।
यः सूर्यं य उषसं जजान यो अपां नेता स जनास इन्द्रः ॥ २ ०१२ ०७
यं क्रन्दसी संयती विह्वयेते परे ऽवर उभया अमित्राः ।
समानं चिद् रथम् आतस्थिवांसा नाना हवेते स जनास इन्द्रः ॥ २ ०१२ ०८
यस्मान् न ऋते विजयन्ते जनासो यं युध्यमाना अवसे हवन्ते ।
यो विश्वस्य प्रतिमानम् बभूव यो अच्युतच्युत् स जनास इन्द्रः ॥ २ ०१२ ०९
यः शश्वतो मह्य् एनो दधानान् अमन्यमानाञ् छर्वा जघान ।
यः शर्धते नानुददाति शृध्यां यो दस्योर् हन्ता स जनास इन्द्रः ॥ २ ०१२ १०
यः शम्बरम् पर्वतेषु क्षियन्तं चत्वारिंश्यां शरद्य् अन्वविन्दत् ।
ओजायमानं यो अहिं जघान दानुं शयानं स जनास इन्द्रः ॥ २ ०१२ ११
यः सप्तरश्मिर् वृषभस् तुविष्मान् अवासृजत् सर्तवे सप्त सिन्धून् ।

यो रौहिणम् अस्फुरद् वज्रबाहुर् द्याम् आरोहन्तं स जनास इन्द्रः ॥ २ ०१२ १२
द्यावा चिद् अस्मै पृथिवी नमेते शुष्माच् चिद् अस्य पर्वता भयन्ते ।
यः सोमपा निचितो वज्रबाहुर् यो वज्रहस्तः स जनास इन्द्रः ॥ २ ०१२ १३
यः सुन्वन्तम् अवति यः पचन्तं यः शंसन्तं यः शशमानम् ऊती ।
यस्य ब्रह्म वर्धनं यस्य सोमो यस्येदं राधः स जनास इन्द्रः ॥ २ ०१२ १४
यः सुन्वते पचते दुध्र आ चिद् वाजं दर्दर्षि स किलासि सत्यः ।
वयं त इन्द्र विश्वह प्रियासः सुवीरासो विदथम् आ वदेम ॥ २ ०१२ १५

(२०४)

ऋतुर् जनित्री तस्या अपस् परि मक्षू जात आविशद् यासु वर्धते ।
तद् आहना अभवत् पिप्युषी पयो ऽंशोः पीयूषम् प्रथमं तद् उक्थ्यम् ॥ २ ०१३ ०१
सध्रीम् आ यन्ति परि बिभ्रतीः पयो विश्वप्स्न्याय प्र भरन्त भोजनम् ।
समानो अध्वा प्रवताम् अनुष्यदे यस् ताकृणोः प्रथमं सास्य् उक्थ्यः ॥ २ ०१३ ०२
अन्व् एको वदति यद् ददाति तद् रूपा मिनन् तदपा एक ईयते ।
विश्वा एकस्य विनुदस् तितिक्षते यस् ताकृणोः प्रथमं सास्य् उक्थ्यः ॥ २ ०१३ ०३
प्रजाभ्यः पुष्टिं विभजन्त आसते रयिम् इव पृष्ठम् प्रभवन्तम् आयते ।
असिन्वन् दंष्ट्रैः पितुर् अत्ति भोजनं यस् ताकृणोः प्रथमं सास्य् उक्थ्यः ॥ २ ०१३ ०४
अधाकृणोः पृथिवीं संदृशे दिवे यो धौतीनाम् अहिहन्न् आरिणक् पथः ।
तं त्वा स्तोमेभिर् उदभिर् न वाजिनं देवं देवा अजनन् सास्य् उक्थ्यः ॥ २ ०१३ ०५
यो भोजनं च दयसे च वर्धनम् आर्द्राद् आ शुष्कम् मधुमद् दुदोहिथ ।
स शेवधिं नि दधिषे विवस्वति विश्वस्यैक ईशिषे सास्य् उक्थ्यः ॥ २ ०१३ ०६
यः पुष्पिणीश् च प्रस्वश् च धर्मणाधि दाने व्य् अ १ वनीर् अधारयः ।
यश् चासमा अजनो दिद्युतो दिव उरुर् ऊर्वाँ अभितः सास्य् उक्थ्यः ॥ २ ०१३ ०७
यो नार्मरं सहवसुं निहन्तवे पृक्षाय च दासवेशाय चावहः ।
ऊर्जयन्त्या अपरिविष्टम् आस्यम् उतैवाद्य पुरुकृत् सास्य् उक्थ्यः ॥ २ ०१३ ०८
शतं वा यस्य दश साकम् आद्य एकस्य श्रुष्टौ यद् ध चोदम् आविथ ।
अरज्जौ दस्यून् सम् उनब् दभीतये सुप्राव्यो अभवः सास्य् उक्थ्यः ॥ २ ०१३ ०९

विश्वेद् अनु रोधना अस्य पौंस्यं ददुर् अस्मै दधिरे कृत्नवे धनम् ।
षळ् अस्तभ्ना विष्टिरः पञ्च संदृशः परि परो अभवः सास्य् उक्थ्यः ॥ २ ०१३ १०
सुप्रवाचनं तव वीर वीर्य१ं यद् एकेन क्रतुना विन्दसे वसु ।
जातूष्ठिरस्य प्र वयः सहस्वतो या चकर्थ सेन्द्र विश्वास्य् उक्थ्यः ॥ २ ०१३ ११
अरमयः सरपसस् तराय कं तुर्वीतये च वय्याय च स्रुतिम् ।
नीचा सन्तम् उद् अनयः परावृजम् प्रान्धं श्रोणं श्रवयन् सास्य् उक्थ्यः ॥ २ ०१३ १२
अस्मभ्यं तद् वसो दानाय राधः सम् अर्थयस्व बहु ते वसव्यम् ।
इन्द्र यच् चित्रं श्रवस्या अनु द्यून् बृहद् वदेम विदथे सुवीराः ॥ २ ०१३ १३

(२०५)
अध्वर्यवो भरतेन्द्राय सोमम् आमत्रेभिः सिञ्चता मद्यम् अन्धः ।
कामी हि वीरः सदम् अस्य पीतिं जुहोत वृष्णे तद् इद् एष वष्टि ॥ २ ०१४ ०१
अध्वर्यवो यो अपो वव्रिवांसं वृत्रं जघानाशन्येव वृक्षम् ।
तस्मा एतम् भरत तद्वशायँ एष इन्द्रो अर्हति पीतिम् अस्य ॥ २ ०१४ ०२
अध्वर्यवो यो दृभीकं जघान यो गा उदाजद् अप हि वलं वः ।
तस्मा एतम् अन्तरिक्षे न वातम् इन्द्रं सोमैर् ओर्णुत जूर् न वस्त्रैः ॥ २ ०१४ ०३
अध्वर्यवो य उरणं जघान नव चख्वांसं नवतिं च बाहून् ।
यो अर्बुदम् अव नीचा बबाधे तम् इन्द्रं सोमस्य भृथे हिनोत ॥ २ ०१४ ०४
अध्वर्यवो यः स्व् अश्नं जघान यः शुष्णम् अशुषं यो व्यंसम् ।
यः पिप्रुं नमुचिं यो रुधिक्रां तस्मा इन्द्रायान्धसो जुहोत ॥ २ ०१४ ०५
अध्वर्यवो यः शतं शम्बरस्य पुरो बिभेदाश्मनेव पूर्वीः ।
यो वर्चिनः शतम् इन्द्रः सहस्रम् अपावपद् भरता सोमम् अस्मै ॥ २ ०१४ ०६
अध्वर्यवो यः शतम् आ सहस्रम् भूम्या उपस्थे ऽवपज् जघन्वान् ।
कुत्सस्यायोर् अतिथिग्वस्य वीरान् न्य् आवृणग् भरता सोमम् अस्मै ॥ २ ०१४ ०७
अध्वर्यवो यन् नरः कामयाध्वे श्रुष्टी वहन्तो नशथा तद् इन्द्रे ।
गभस्तिपूतम् भरत श्रुतायेन्द्राय सोमं यज्यवो जुहोत ॥ २ ०१४ ०८
अध्वर्यवः कर्तना श्रुष्टिम् अस्मै वने निपूतं वन उन् नयध्वम् ।

जुषाणो हस्त्यम् अभि वावशे व इन्द्राय सोमम् मदिरं जुहोत ॥ २ ०१४ ०९
अध्वर्यवः पयसोधर् यथा गोः सोमेभिर् ईम् पृणता भोजम् इन्द्रम् ।
वेदाहम् अस्य निभृतम् म एतद् दित्सन्तम् भूयो यजतश् चिकेत ॥ २ ०१४ १०
अध्वर्यवो यो दिव्यस्य वस्वो यः पार्थिवस्य क्षम्यस्य राजा ।
तम् ऊर्दरं न पृणता यवेनेन्द्रं सोमेभिस् तद् अपो वो अस्तु ॥ २ ०१४ ११
अस्मभ्यं तद् वसो दानाय राधः सम् अर्थयस्व बहु ते वसव्यम् ।
इन्द्र यच् चित्रं श्रवस्या अनु द्यून् बृहद् वदेम विदथे सुवीराः ॥ २ ०१४ १२

(२०६)
प्र घा न्व् अस्य महतो महानि सत्या सत्यस्य करणानि वोचम् ।
त्रिकद्रुकेष्व् अपिबत् सुतस्यास्य मदे अहिम् इन्द्रो जघान ॥ २ ०१५ ०१
अवंशे द्याम् अस्तभायद् बृहन्तम् आ रोदसी अपृणद् अन्तरिक्षम् ।
स धारयत् पृथिवीम् पप्रथच् च सोमस्य ता मद इन्द्रश् चकार ॥ २ ०१५ ०२
सद्मेव प्राचो वि मिमाय मानैर् वज्रेण खान्य् अतृणन् नदीनाम् ।
वृथासृजत् पथिभिर् दीर्घयाथैः सोमस्य ता मद इन्द्रश् चकार ॥ २ ०१५ ०३
स प्रवोळ्हॄन् परिगत्या दभीतेर् विश्वम् अधाग् आयुधम् इद्धे अग्नौ ।
सं गोभिर् अश्वैर् असृजद् रथेभिः सोमस्य ता मद इन्द्रश् चकार ॥ २ ०१५ ०४
स ईम् महीं धुनिम् एतोर् अरम्णात् सो अस्नातॄन् अपारयत् स्वस्ति ।
त उत्स्नाय रयिम् अभि प्र तस्थुः सोमस्य ता मद इन्द्रश् चकार ॥ २ ०१५ ०५
सोदञ्चं सिन्धुम् अरिणान् महित्वा वज्रेणान उषसः सम् पिपेष ।
अजवसो जविनीभिर् विवृश्चन् सोमस्य ता मद इन्द्रश् चकार ॥ २ ०१५ ०६
स विद्वाँ अपगोहं कनीनाम् आविर् भवन्न् उद् अतिष्ठत् परावृक् ।
प्रति श्रोण स्थाद् व्य् अ१ नग् अचष्ट सोमस्य ता मद इन्द्रश् चकार ॥ २ ०१५ ०७
भिनद् वलम् अङ्गिरोभिर् गृणानो वि पर्वतस्य दृंहितान्य् ऐरत् ।
रिणग् रोधांसि कृत्रिमाण्य् एषां सोमस्य ता मद इन्द्रश् चकार ॥ २ ०१५ ०८
स्वप्नेनाभ्युप्या चुमुरिं धुनिं च जघन्थ दस्युम् प्र दभीतिम् आवः ।
रम्भी चिद् अत्र विविदे हिरण्यं सोमस्य ता मद इन्द्रश् चकार ॥ २ ०१५ ०९

नू॒नं सा ते॒ प्रति॒ वरं॑ जरि॒त्रे दु॑ही॒यद् इ॑न्द्र॒ दक्षि॑णा म॒घोनी॑ ।
शिक्षा॑ स्तो॒तृभ्यो॒ माति॑ ध॒ग् भगो॑ नो बृ॒हद् व॑देम वि॒दथे॑ सु॒वीराः॑ ॥ २ ०१५ १०

(२०७)
प्र वः॑ स॒तां ज्येष्ठ॑तमाय सुष्टु॒तिम् अ॒ग्नाव् इ॑व समिधा॒ने ह॒विर् भ॑रे ।
इन्द्र॑म् अजु॒र्यं ज॒रय॑न्तम् उक्षि॒तं स॒नाद् युवा॑न॒म् अव॑से हवामहे ॥ २ ०१६ ०१
यस्मा॒द् इन्द्रा॑द् बृह॒तः किं च॒नेम् ऋ॒ते विश्वा॑न्य् अस्मि॒न् सम्भृ॒ताधि॑ वी॒र्या॑ ।
ज॒ठरे॒ सोमं॑ त॒न्वी॒३॑ सहो॒ महो॒ हस्ते॒ वज्र॒म् भर॑ति शी॒र्षणि॒ क्रतु॑म् ॥ २ ०१६ ०२
न क्षो॒णीभ्या॑म् परि॒भ्वे॑ त इ॑न्द्रि॒यं न स॑मु॒द्रैः पर्व॑तैर् इन्द्र॒ ते रथः॑ ।
न ते॒ वज्र॒म् अन्व् अ॑श्नोति॒ कश् च॒न यद् आ॒शुभिः॒ पत॑सि॒ योज॑ना पु॒रु ॥ २ ०१६ ०३
विश्वे॒ ह्य् अ॑स्मै यज॒ताय॑ धृ॒ष्णवे॒ क्रतु॒म् भर॑न्ति वृष॒भाय॒ सश्च॑ते ।
वृषा॑ यजस्व ह॒विषा॑ वि॒दुष्ट॑रः॒ पिबे॑न्द्र॒ सोमं॑ वृष॒भेण॑ भा॒नुना॑ ॥ २ ०१६ ०४
वृष्णः॒ कोशः॑ पवते॒ मध्व॑ ऊ॒र्मिर् वृ॑ष॒भान्ना॑य वृष॒भाय॒ पात॑वे ।
वृष॑णाध्व॒र्यू वृ॑ष॒भासो॒ अद्र॑यो॒ वृष॑णं॒ सोमं॑ वृष॒भाय॑ सुष्वति ॥ २ ०१६ ०५
वृषा॑ ते॒ वज्र॑ उ॒त ते॒ वृषा॒ रथो॒ वृष॑णा॒ हरी॑ वृष॒भाण्य् आयु॑धा ।
वृष्णो॒ मद॑स्य वृषभ॒ त्वम् ई॑शिष॒ इन्द्र॒ सोम॑स्य वृष॒भस्य॑ तृष्णुहि ॥ २ ०१६ ०६
प्र ते॒ नावं॒ न सम॑ने वच॒स्युव॒म् ब्रह्म॑णा यामि॒ सव॑नेषु॒ दाधृ॑षिः ।
कु॒विन् नो॑ अ॒स्य वच॑सो नि॒बोधि॑ष॒द् इन्द्र॒म् उत्सं॒ न वसु॑नः सिचामहे ॥ २ ०१६ ०७
पु॒रा स॑म्बा॒धाद् अ॒भ्य् आ व॑वृत्स्व नो धे॒नुर् न व॒त्सं यव॑सस्य पि॒प्युषी॑ ।
स॒कृत् सु ते॑ सुम॒तिभिः॑ शतक्रतो॒ सम् पत्नी॑भि॒र् न वृष॑णो नसीमहि ॥ २ ०१६ ०८
नू॒नं सा ते॒ प्रति॒ वरं॑ जरि॒त्रे दु॑ही॒यद् इ॑न्द्र॒ दक्षि॑णा म॒घोनी॑ ।
शिक्षा॑ स्तो॒तृभ्यो॒ माति॑ ध॒ग् भगो॑ नो बृ॒हद् व॑देम वि॒दथे॑ सु॒वीराः॑ ॥ २ ०१६ ०९

(२०८)
तद् अ॑स्मै॒ नव्य॑म् अङ्गिर॒स्वद् अ॑र्चत॒ शुष्मा॒ यद् अ॑स्य प्र॒त्नथो॒दीर॑ते ।
विश्वा॒ यद् गो॒त्रा सह॑सा॒ परी॑वृता॒ मदे॒ सोम॑स्य दृंहि॒तान्य् ऐर॑यत् ॥ २ ०१७ ०१

स भू॒तु यो ह॑ प्रथ॒माय॒ धाय॑स॒ ओजो॒ मिमा॑नो महि॒मान॒म् आति॑रत् ।
शूरो॒ यो यु॒त्सु त॒न्व॑म् परि॒व्यत॑ शी॒र्षणि॒ द्याम् म॑हि॒ना प्रत्य् अ॑मुञ्चत ॥ २ ०१७ ०२
अधा॑कृणोः प्रथ॒मं वी॒र्य॑म् म॒हद् यद् अ॒स्याग्रे॒ ब्रह्म॑णा शु॒ष्मम् ऐर॑यः ।
र॒थे॒ष्ठेन॒ हर्य॑श्वेन॒ विच्यु॑ताः॒ प्र जी॒रयः॑ सिस्रते स॒ध्र्य१॒क् पृथ॑क् ॥ २ ०१७ ०३
अधा॒ यो विश्वा॒ भुव॑नाभि म॒ज्मने॑शान॒कृत् प्रव॑या अ॒भ्य् अव॑र्धत ।
आद् रोद॑सी॒ ज्योति॑षा॒ वह्नि॒र् आत॑नो॒त् सीव्य॒न् तमां॑सि॒ दुधि॑ता॒ सम् अ॑व्ययत् ॥ २ ०१७ ०४
स प्रा॒चीना॒न् पर्व॑तान् दृंह॒द् ओज॑साधरा॒चीन॑म् अकृणोद् अ॒पाम् अपः॑ ।
अधा॑रयत् पृथि॒वीं वि॒श्वधा॑यसम् अस्त॑भ्नान् मा॒यया॒ द्याम् अ॑व॒स्रसः॑ ॥ २ ०१७ ०५
सास्मा॒ अर॑म् बा॒हुभ्यां॒ यम् पि॒ताकृ॑णो॒द् विश्व॑स्मा॒द् आ ज॒नुषो॒ वेद॑स॒स् परि॑ ।
येना॑ पृथि॒व्यां नि क्रिविं॑ श॒यध्यै॒ वज्रे॑ण ह॒त्व्य् अवृ॑णक् तुवि॒ष्वणिः॑ ॥ २ ०१७ ०६
अ॒मा॒जूर् इ॑व पि॒त्रोः सचा॑ स॒ती स॑मा॒नाद् आ सद॑स॒स् त्वाम् इ॑ये॒ भग॑म् ।
कृ॒धि प्र॑के॒तम् उप॑ मा॒स्य् आ भ॑र द॒द्धि भा॒गं त॒न्वो॒३॑ येन॑ मा॒महः॑ ॥ २ ०१७ ०७
भो॒जं त्वाम् इ॑न्द्र व॒यं हु॑वेम द॒दिष् ट्वम् इ॒न्द्रापां॑सि॒ वाजा॑न् ।
अ॒वि॒ड्ढीन्द्र चि॒त्रया॑ न ऊ॒ती कृ॒धि वृ॑षन्न् इन्द्र॒ वस्य॑सो नः ॥ २ ०१७ ०८
नू॒नं सा ते॒ प्रति॒ वरं॑ जरि॒त्रे दु॑ही॒यद् इ॑न्द्र॒ दक्षि॑णा म॒घोनी॑ ।
शिक्षा॑ स्तो॒तृभ्यो॒ माति॑ ध॒ग् भगो॑ नो बृ॒हद् व॑देम वि॒दथे॑ सु॒वीराः॑ ॥ २ ०१७ ०९

(२०९)
प्रा॒ता रथो॒ नवो॑ योजि॒ सस्नि॒श् चतु॑र्युगस् त्रि॒कशः स॒प्तर॑श्मिः ।
दशा॑रित्रो मनु॒ष्यः॑ स्व॒र्षाः स इ॒ष्टिभि॑र् म॒तिभी॒ रंह्यो॑ भूत् ॥ २ ०१८ ०१
सास्मा॒ अर॑म् प्रथ॒मं स द्वि॒तीय॑म् उ॒तो तृ॒तीय॑म् मनु॒षः स होता॑ ।
अ॒न्यस्या॒ गर्भ॑म् अ॒न्य ऊ॑ जनन्त॒ सो अ॒न्येभिः॑ सचते॒ जेन्यो॒ वृषा॑ ॥ २ ०१८ ०२
हरी॒ नु कं॒ रथ॒ इन्द्र॑स्य योजम् आ॒यै सू॒क्तेन॒ वच॑सा॒ नवे॑न ।
मो षु त्वाम् अत्र॑ ब॒हवो॒ हि विप्रा॒ नि री॑रम॒न् यज॑मानासो अ॒न्ये ॥ २ ०१८ ०३
आ द्वाभ्यां॒ हरि॑भ्याम् इन्द्र याह्य् आ च॒तुर्भि॒र् आ ष॒ड्भिर् हू॒यमा॑नः ।
आ॒ष्टाभि॒र् द॒शभिः॑ सोम॒पेय॑म् अ॒यं सु॒तः सु॑मख॒ मा मृध॑स् कः ॥ २ ०१८ ०४

आ विंशत्या त्रिंशता याह्य् अर्वाङ् आ चत्वारिंशता हरिभिर् युजानः ।
आ पञ्चाशता सुरथेभिर् इन्द्रा षष्ट्या सप्तत्या सोमपेयम् ॥ २ ०१८ ०५
आशीत्या नवत्या याह्य् अर्वाङ् आ शतेन हरिभिर् उह्यमानः ।
अयं हि ते शुनहोत्रेषु सोम इन्द्र त्वाया परिषिक्तो मदाय ॥ २ ०१८ ०६
मम ब्रह्मेन्द्र याह्य् अच्छा विश्वा हरी धुरि धिष्वा रथस्य ।
पुरुत्रा हि विहव्यो बभूथास्मिञ् छूर सवने मादयस्व ॥ २ ०१८ ०७
न म इन्द्रेण सख्यं वि योषद् अस्मभ्यम् अस्य दक्षिणा दुहीत ।
उप ज्येष्ठे वरूथे गभस्तौ प्राये-प्राये जिगीवांसः स्याम ॥ २ ०१८ ०८
नूनं सा ते प्रति वरं जरित्रे दुहीयद् इन्द्र दक्षिणा मघोनी ।
शिक्षा स्तोतृभ्यो माति धग् भगो नो बृहद् वदेम विदथे सुवीराः ॥ २ ०१८ ०९

(२१०)
अपाय्य् अस्यान्धसो मदाय मनीषिणः सुवानस्य प्रयसः ।
यस्मिन्न् इन्द्रः प्रदिवि वावृधान ओको दधे ब्रह्मण्यन्तश् च नरः ॥ २ ०१९ ०१
अस्य मन्दानो मध्वो वज्रहस्तो ऽहिम् इन्द्रो अर्णोवृतं वि वृश्चत् ।
प्र यद् वयो न स्वसराण्य् अच्छा प्रयांसि च नदीनां चक्रमन्त ॥ २ ०१९ ०२
स माहिन इन्द्रो अर्णो अपाम् प्रैरयद् अहिहाच्छा समुद्रम् ।
अजनयत् सूर्यं विदद् गा अक्तुनाह्नां वयुनानि साधत् ॥ २ ०१९ ०३
सो अप्रतीनि मनवे पुरूणीन्द्रो दाशद् दाशुषे हन्ति वृत्रम् ।
सद्यो यो नृभ्यो अतसाय्यो भूत् पस्पृधानेभ्यः सूर्यस्य सातौ ॥ २ ०१९ ०४
स सुन्वत इन्द्रः सूर्यम् आ देवो रिणङ् मर्त्याय स्तवान् ।
आ यद् रयिं गुहदवद्यम् अस्मै भरद् अंशं नैतशो दशस्यन् ॥ २ ०१९ ०५
स रन्धयत् सदिवः सारथये शुष्णम् अशुषं कुयवं कुत्साय ।
दिवोदासाय नवतिं च नवेन्द्रः पुरो व्य् ऐरच् छम्बरस्य ॥ २ ०१९ ०६
एवा त इन्द्रोचथम् अहेम श्रवस्या न त्मना वाजयन्तः ।
अश्याम तत् साप्तम् आशुषाणा ननमो वधर् अदेवस्य पीयोः ॥ २ ०१९ ०७
एवा ते गृत्समदाः शूर मन्मावस्यवो न वयुनानि तक्षुः ।

ब्रह्मण्यन्त इन्द्र ते नवीय इषम् ऊर्जं सुक्षितिं सुम्नम् अश्युः ॥ २ ०१९ ०८
नूनं सा ते प्रति वरं जरित्रे दुहीयद् इन्द्र दक्षिणा मघोनी ।
शिक्षा स्तोतृभ्यो माति धग् भगो नो बृहद् वदेम विदथे सुवीराः ॥ २ ०१९ ०९

(२११)
वयं ते वय इन्द्र विद्धि षु णः प्र भरामहे वाजयुर् न रथम् ।
विपन्यवो दीध्यतो मनीषा सुम्नम् इयक्षन्तस् त्वावतो नॄन् ॥ २ ०२० ०१
त्वं न इन्द्र त्वाभिर् ऊती त्वायतो अभिष्टिपासि जनान् ।
त्वम् इनो दाशुषो वरूतेत्थाधीर् अभि यो नक्षति त्वा ॥ २ ०२० ०२
स नो युवेन्द्रो जोहूत्रः सखा शिवो नराम् अस्तु पाता ।
यः शंसन्तं यः शशमानम् ऊती पचन्तं च स्तुवन्तं च प्रणेषत् ॥ २ ०२० ०३
तम् उ स्तुष इन्द्रं तं गृणीषे यस्मिन् पुरा वावृधुः शाशदुश् च ।
स वस्वः कामम् पीपरद् इयानो ब्रह्मण्यतो नूतनस्यायोः ॥ २ ०२० ०४
सो अङ्गिरसाम् उचथा जुजुष्वान् ब्रह्मा तूतोद् इन्द्रो गातुम् इष्णन् ।
मुष्णन्न् उषसः सूर्येण स्तवान् अश्नस्य चिच् छिश्नथत् पूर्व्याणि ॥ २ ०२० ०५
स ह श्रुत इन्द्रो नाम देव ऊर्ध्वो भुवन् मनुषे दस्मतमः ।
अव प्रियम् अर्शसानस्य साह्वाञ् छिरो भरद् दासस्य स्वधावान् ॥ २ ०२० ०६
स वृत्रहेन्द्रः कृष्णयोनीः पुरंदरो दासीर् ऐरयद् वि ।
अजनयन् मनवे क्षाम् अपश् च सत्रा शंसं यजमानस्य तूतोत् ॥ २ ०२० ०७
तस्मै तवस्य १ म् अनु दायि सत्रेन्द्राय देवेभिर् अर्णसातौ ।
प्रति यद् अस्य वज्रम् बाह्वोर् धुर् हत्वी दस्यून् पुर आयसीर् नि तारीत् ॥ २ ०२०
०८
नूनं सा ते प्रति वरं जरित्रे दुहीयद् इन्द्र दक्षिणा मघोनी ।
शिक्षा स्तोतृभ्यो माति धग् भगो नो बृहद् वदेम विदथे सुवीराः ॥ २ ०२० ०९

(२१२)

विश्वजिते धनजिते स्वर्जिते सत्राजिते नृजित उर्वराजिते ।
अश्वजिते गोजिते अब्जिते भरेन्द्राय सोमं यजताय हर्यतम् ॥ २ ०२१ ०१
अभिभुवे ऽभिभङ्गाय वन्वते ऽषाळ्हाय सहमानाय वेधसे ।
तुविग्रये वह्नये दुष्टरीतवे सत्रासाहे नम इन्द्राय वोचत ॥ २ ०२१ ०२
सत्रासाहो जनभक्षो जनंसहश् च्यवनो युध्मो अनु जोषम् उक्षितः ।
वृतंचयः सहुरिर् विक्ष्व् आरित इन्द्रस्य वोचम् प्र कृतानि वीर्या ॥ २ ०२१ ०३
अनानुदो वृषभो दोधतो वधो गम्भीर ऋष्वो असमष्टकाव्यः ।
रध्रचोदः श्नथनो वीळितस् पृथुर् इन्द्रः सुयज्ञ उषसः स्वर् जनत् ॥ २ ०२१ ०४
यज्ञेन गातुम् अप्तुरो विविद्रिरे धियो हिन्वाना उशिजो मनीषिणः ।
अभिस्वरा निषदा गा अवस्यव इन्द्रे हिन्वाना द्रविणान्य् आशत ॥ २ ०२१ ०५
इन्द्र श्रेष्ठानि द्रविणानि धेहि चित्तिं दक्षस्य सुभगत्वम् अस्मे ।
पोषं रयीणाम् अरिष्टिं तनूनां स्वाद्मानं वाचः सुदिनत्वम् अह्नाम् ॥ २ ०२१ ०६

(२१३)
त्रिकद्रुकेषु महिषो यवाशिरं तुविशुष्मस् ।
तृपत् सोमम् अपिबद् विष्णुना सुतं यथावशत् ।
स ईम् ममाद महि कर्म कर्तवे महाम् उरुं ।
सैनं सश्चद् देवो देवं सत्यम् इन्द्रं सत्य इन्दुः ॥ २ ०२२ ०१
अध त्विषीमाँ अभ्य् ओजसा क्रिविं युधाभवद् ।
आ रोदसी अपृणद् अस्य मज्मना प्र वावृधे ।
अधत्तान्यं जठरे प्रेम् अरिच्यत ।
सैनं सश्चद् देवो देवं सत्यम् इन्द्रं सत्य इन्दुः ॥ २ ०२२ ०२
साकं जातः क्रतुना साकम् ओजसा ववक्षिथ ।
साकं वृद्धो वीर्यैः सासहिर् मृधो विचर्षणिः ।
दाता राध स्तुवते काम्यं वसु ।
सैनं सश्चद् देवो देवं सत्यम् इन्द्रं सत्य इन्दुः ॥ २ ०२२ ०३
तव त्यन् नर्यं नृतो ऽप इन्द्र प्रथमम् पूर्व्यं दिवि प्रवाच्यं कृतम् ।

यद् देवस्य शवसा प्रारिणा असुं रिणन्न् अपः ।
भुवद् विश्वम् अभ्य् आदेवम् ओजसा विदाद् ऊर्जं शतक्रतुर् विदाद् इषम् ॥ २ ०२२ ०४

(२१४)
गणानां त्वा गणपतिं हवामहे कविं कवीनाम् उपमश्रवस्तमम् ।
ज्येष्ठराजम् ब्रह्मणाम् ब्रह्मणस् पत आ नः शृण्वन्न् ऊतिभिः सीद सादनम् ॥ २ ०२३ ०१
देवाश् चित् ते असुर्य प्रचेतसो बृहस्पते यज्ञियम् भागम् आनशुः ।
उस्रा इव सूर्यो ज्योतिषा महो विश्वेषाम् इज् जनिता ब्रह्मणाम् असि ॥ २ ०२३ ०२
आ विबाध्या परिरापस् तमांसि च ज्योतिष्मन्तं रथम् ऋतस्य तिष्ठसि ।
बृहस्पते भीमम् अमित्रदम्भनं रक्षोहणं गोत्रभिदं स्वर्विदम् ॥ २ ०२३ ०३
सुनीतिभिर् नयसि त्रायसे जनं यस् तुभ्यं दाशान् न तम् अंहो अश्नवत् ।
ब्रह्मद्विषस् तपनो मन्युमीर् असि बृहस्पते महि तत् ते महित्वनम् ॥ २ ०२३ ०४
न तम् अंहो न दुरितं कुतश् चन नारातयस् तितिरुर् न द्वयाविनः ।
विश्वा इद् अस्माद् ध्वरसो वि बाधसे यं सुगोपा रक्षसि ब्रह्मणस् पते ॥ २ ०२३ ०५
त्वं नो गोपाः पथिकृद् विचक्षणस् तव व्रताय मतिभिर् जरामहे ।
बृहस्पते यो नो अभि ह्वरो दधे स्वा तम् मर्मर्तु दुच्छुना हरस्वती ॥ २ ०२३ ०६
उत वा यो नो मर्चयाद् अनागसो ऽरातीवा मर्तः सानुको वृकः ।
बृहस्पते अप तं वर्तया पथः सुगं नो अस्यै देववीतये कृधि ॥ २ ०२३ ०७
त्रातारं त्वा तनूनां हवामहे ऽवस्पर्तर् अधिवक्तारम् अस्मयुम् ।
बृहस्पते देवनिदो नि बर्हय मा दुरेवा उत्तरं सुम्नम् उन् नशन् ॥ २ ०२३ ०८
त्वया वयं सुवृधा ब्रह्मणस् पते स्पार्हा वसु मनुष्या ददीमहि ।
या नो दूरे तळितो या अरातयो ऽभि सन्ति जम्भया ता अनप्नसः ॥ २ ०२३ ०९
त्वया वयम् उत्तमं धीमहे वयो बृहस्पते पप्रिणा सस्निना युजा ।
मा नो दुःशंसो अभिदिप्सुर् ईशत प्र सुशंसा मतिभिस् तारिषीमहि ॥ २ ०२३ १०
अनानुदो वृषभो जग्मिर् आहवं निष्टप्ता शत्रुम् पृतनासु सासहिः ।
असि सत्य ऋणया ब्रह्मणस् पत उग्रस्य चिद् दमिता वीळुहर्षिणः ॥ २ ०२३ ११

अदे॑वेन॒ मन॑सा॒ यो रि॑षण्यति॑ शा॒साम् उ॒ग्रो मन्य॑मानो॒ जिघां॑सति ।
बृह॑स्पते॒ मा प्रण॒क् तस्य॑ नो व॒धो नि क॑र्म म॒न्युं दु॒रेव॑स्य॒ शर्ध॑तः ॥ २ ०२३ १२
भरे॑षु ह॒व्यो नम॑सोप॒सद्यो॒ गन्ता॒ वाजे॑षु॒ सनि॑ता॒ धनं॑-धनम् ।
विश्वा॒ इद् अ॒र्यो अ॑भिदि॒प्स्वो॒ ३ मृधो॒ बृह॒स्पति॒र् वि व॑वर्हा॒ रथाँ॑ इव ॥ २ ०२३ १३
तेजि॑ष्ठया तप॒नी र॒क्षस॑स् तप॒ ये त्वा॑ नि॒दे द॑धि॒रे दृ॒ष्टवी॑र्यम् ।
आ॒विस् तत् कृ॑ष्व॒ यद् अस॑त् त उ॒क्थ्य॒ १ म् बृह॑स्पते॒ वि प॑रि॒रापो॑ अर्दय ॥ २ ०२३ १४
बृह॑स्पते॒ अति॒ यद् अ॒र्यो अर्हा॑द् द्यु॒मद् वि॒भाति॒ क्रतु॑मज् जने॑षु ।
यद् दी॒दय॒च् छव॑स ऋतप्रजात॒ तद् अ॒स्मासु॒ द्रवि॑णं धेहि चि॒त्रम् ॥ २ ०२३ १५
मा न॑ स्ते॒नेभ्यो॒ ये अ॒भि द्रु॒हस् प॒दे नि॑रा॒मिणो॑ रि॒पवो ऽन्ने॑षु जागृ॒धुः ।
आ दे॒वाना॒म् ओह॑ते॒ वि व्रयो॑ हृ॒दि बृह॑स्पते॒ न प॒रः साम्नो॑ विदुः ॥ २ ०२३ १६
विश्वे॑भ्यो॒ हि त्वा॒ भुव॑नेभ्य॒स् परि॒ त्वष्टाज॑नत् साम्नः॑-साम्नः क॒विः ।
स ऋ॑ण॒चिद् ऋ॑ण॒या ब्रह्म॑ण॒स् पति॑र् द्रु॒हो ह॒न्ता म॒ह ऋ॒तस्य॑ ध॒र्तरि॑ ॥ २ ०२३ १७
तव॑ श्रि॒ये व्य् अ॑जिहीत॒ पर्व॑तो॒ गवां॑ गो॒त्रम् उ॒दसृ॑जो॒ यद् अ॑ङ्गिरः ।
इन्द्रे॑ण यु॒जा तम॑सा॒ परी॑वृत॒म् बृह॑स्पते॒ निर् अ॒पाम् औ॑ब्जो अर्ण॒वम् ॥ २ ०२३ १८
ब्रह्म॑णस् पते॒ त्वम् अ॒स्य य॒न्ता सू॒क्तस्य॑ बोधि॒ तन॑यं च जिन्व ।
विश्वं॒ तद् भ॒द्रं यद् अव॑न्ति दे॒वा बृ॒हद् व॑देम वि॒दथे॑ सु॒वीराः॑ ॥ २ ०२३ १९

(२१५)
सेमाम् अ॑विड्ढि॒ प्रभृ॑तिं॒ य ईशि॑षे॒ ऽया वि॑धेम॒ नव॑या म॒हा गि॒रा ।
यथा॑ नो मी॒ढ्वान् स्तव॑ते॒ सखा॒ तव॒ बृह॑स्पते॒ सीष॑धः॒ सोत नो॑ म॒तिम् ॥ २ ०२४ ०१
यो नन्त्वा॒न्य् अन॑म॒न् न्य् ओज॑सो॒ताद॑र्दर् म॒न्युना॒ शम्ब॑राणि॒ वि ।
प्राच्याव॑य॒द् अच्यु॑ता॒ ब्रह्म॑ण॒स् पति॑र् आ चावि॑श॒द् वसु॑मन्तं॒ वि पर्व॑तम् ॥ २ ०२४ ०२
तद् दे॒वानां॑ दे॒वत॑माय॒ कर्त्व॑म् अश्र॑थ्नन् दृ॒ळ्हाव्र॑दन्त वीळि॒ता ।
उद् गा आ॑ज॒द् अभि॑न॒द् ब्रह्म॑णा व॒लम् अगू॑हत् तमो॒ व्य् अचक्षय॒त् स्वः॑ ॥ २ ०२४ ०३
अश्मा॑स्यम् अव॒तम् ब्रह्म॑ण॒स् पति॒र् मधु॑धारम् अ॒भि यम् ओज॒सातृ॑णत् ।
तम् ए॒व विश्वे॑ पपिरे स्व॒र्दृशो॑ ब॒हु सा॒कं सिसि॑चु॒र् उत्स॑म् उ॒द्रिण॑म् ॥ २ ०२४ ०४

सना ता का चिद् भुवना भवीत्वा माद्भिः शरद्भिर् दुरो वरन्त वः ।
अयतन्ता चरतो अन्यद्-अन्यद् इद् या चकार वयुना ब्रह्मणस् पतिः ॥ २ ०२४ ०५
अभिनक्षन्तो अभि ये तम् आनशुर् निधिम् पणीनाम् परमं गुहा हितम् ।
ते विद्वांसः प्रतिचक्ष्यानृता पुनर् यत उ आयन् तद् उद् ईयुर् आविशम् ॥ २ ०२४ ०६
ऋतावानः प्रतिचक्ष्यानृता पुनर् आत आ तस्थुः कवयो महस् पथः ।
ते बाहुभ्यां धमितम् अग्निम् अश्मनि नकिः षो अस्त्य् अरणो जहुर् हि तम् ॥ २ ०२४ ०७
ऋतज्येन क्षिप्रेण ब्रह्मणस् पतिर् यत्र वष्टि प्र तद् अश्नोति धन्वना ।
तस्य साध्वीर् इषवो याभिर् अस्यति नृचक्षसो दृशये कर्णयोनयः ॥ २ ०२४ ०८
स संनयः स विनयः पुरोहितः स सुष्टुतः स युधि ब्रह्मणस् पतिः ।
चाक्ष्मो यद् वाजम् भरते मती धनाद् इत् सूर्यस् तपति तप्यतुर् वृथा ॥ २ ०२४ ०९
विभु प्रभु प्रथमम् मेहनावतो बृहस्पतेः सुविदत्राणि राध्या ।
इमा सातानि वेन्यस्य वाजिनो येन जना उभये भुञ्जते विशः ॥ २ ०२४ १०
यो ऽवरे वृजने विश्वथा विभुर् महाम् उ रण्वः शवसा ववक्षिथ ।
स देवो देवान् प्रति पप्रथे पृथु विश्वेद् उ ता परिभूर् ब्रह्मणस् पतिः ॥ २ ०२४ ११
विश्वं सत्यम् मघवाना युवोर् इद् आपश् चन प्र मिनन्ति व्रतं वाम् ।
अच्छेन्द्राब्रह्मणस्पती हविर् नो ऽन्नं युजेव वाजिना जिगातम् ॥ २ ०२४ १२
उताशिष्ठा अनु शृण्वन्ति वह्नयः सभेयो विप्रो भरते मती धना ।
वीळुद्वेषा अनु वश ऋणम् आददिः स ह वाजी समिथे ब्रह्मणस् पतिः ॥ २ ०२४ १३
ब्रह्मणस् पतेर् अभवद् यथावशं सत्यो मन्युर् महि कर्मा करिष्यतः ।
यो गा उदाजत् स दिवे वि चाभजन् महीव रीतिः शवसासरत् पृथक् ॥ २ ०२४ १४
ब्रह्मणस् पते सुयमस्य विश्वहा रायः स्याम रथ्यो ३ वयस्वतः ।
वीरेषु वीराँ उप पृङ्धि नस् त्वं यद् ईशानो ब्रह्मणा वेषि मे हवम् ॥ २ ०२४ १५
ब्रह्मणस् पते त्वम् अस्य यन्ता सूक्तस्य बोधि तनयं च जिन्व ।
विश्वं तद् भद्रं यद् अवन्ति देवा बृहद् वदेम विदथे सुवीराः ॥ २ ०२४ १६

(२१६)

इन्धानो अग्निं वनवद् वनुष्यतः कृतब्रह्मा शूशुवद् रातहव्य इत् ।
जातेन जातम् अति स प्र सर्सृते यं-यं युजं कृणुते ब्रह्मणस् पतिः ॥ २ ०२५ ०१
वीरेभिर् वीरान् वनवद् वनुष्यतो गोभी रयिम् पप्रथद् बोधति त्मना ।
तोकं च तस्य तनयं च वर्धते यं-यं युजं कृणुते ब्रह्मणस् पतिः ॥ २ ०२५ ०२
सिन्धुर् न क्षोदः शिमीवाँ ऋघायतो वृषेव वध्रीँर् अभि वष्ट्य् ओजसा ।
अग्नेर् इव प्रसितिर् नाह वर्तवे यं-यं युजं कृणुते ब्रह्मणस् पतिः ॥ २ ०२५ ०३
तस्मा अर्षन्ति दिव्या असश्चतः स सत्वभिः प्रथमो गोषु गच्छति ।
अनिभृष्टतविषिर् हन्त्य् ओजसा यं-यं युजं कृणुते ब्रह्मणस् पतिः ॥ २ ०२५ ०४
तस्मा इद् विश्वे धुनयन्त सिन्धवो ऽच्छिद्रा शर्म दधिरे पुरूणि ।
देवानां सुम्ने सुभगः स एधते यं-यं युजं कृणुते ब्रह्मणस् पतिः ॥ २ ०२५ ०५

(२१७)
ऋजुर् इच् छंसो वनवद् वनुष्यतो देवयन्न् इद् अदेवयन्तम् अभ्य् असत् ।
सुप्रावीर् इद् वनवत् पृत्सु दुष्टरं यज्वेद् अयज्योर् वि भजाति भोजनम् ॥ २ ०२६ ०१
यजस्व वीर प्र विहि मनायतो भद्रम् मनः कृणुष्व वृत्रतूर्ये ।
हविष् कृणुष्व सुभगो यथाससि ब्रह्मणस् पतेर् अव आ वृणीमहे ॥ २ ०२६ ०२
स इज् जनेन स विशा स जन्मना स पुत्रैर् वाजम् भरते धना नृभिः ।
देवानां यः पितरम् आविवासति श्रद्धामना हविषा ब्रह्मणस् पतिम् ॥ २ ०२६ ०३
यो अस्मै हव्यैर् घृतवद्भिर् अविधत् प्र तम् प्राचा नयति ब्रह्मणस् पतिः ।
उरुष्यतीम् अंहसो रक्षती रिषो ऽंहोश् चिद् अस्मा उरुचक्रिर् अद्भुतः ॥ २ ०२६ ०४

(२१८)
इमा गिर आदित्येभ्यो घृतस्नूः सनाद् राजभ्यो जुह्वा जुहोमि ।
शृणोतु मित्रो अर्यमा भगो नस् तुविजातो वरुणो दक्षो अंशः ॥ २ ०२७ ०१
इमं स्तोमं सक्रतवो मे अद्य मित्रो अर्यमा वरुणो जुषन्त ।
आदित्यासः शुचयो धारपूता अवृजिना अनवद्या अरिष्टाः ॥ २ ०२७ ०२

त आदित्यास उरवो गभीरा अदब्धासो दिप्सन्तो भूर्यक्षाः ।
अन्तः पश्यन्ति वृजिनोत साधु सर्वं राजभ्यः परमा चिद् अन्ति ॥ २ ०२७ ०३
धारयन्त आदित्यासो जगत् स्था देवा विश्वस्य भुवनस्य गोपाः ।
दीर्घाधियो रक्षमाणा असुर्यम् ऋतावानश् चयमाना ऋणानि ॥ २ ०२७ ०४
विद्याम् आदित्या अवसो वो अस्य यद् अर्यमन् भय आ चिन् मयोभु ।
युष्माकम् मित्रावरुणा प्रणीतौ परि श्वभ्रेव दुरितानि वृज्याम् ॥ २ ०२७ ०५
सुगो हि वो अर्यमन् मित्र पन्था अनृक्षरो वरुण साधुर् अस्ति ।
तेनादित्या अधि वोचता नो यच्छता नो दुष्परिहन्तु शर्म ॥ २ ०२७ ०६
पिपर्तु नो अदिती राजपुत्राति द्वेषांस्य् अर्यमा सुगेभिः ।
बृहन् मित्रस्य वरुणस्य शर्मोप स्याम पुरुवीरा अरिष्टाः ॥ २ ०२७ ०७
तिस्रो भूमीर् धारयन् त्रीँर् उत द्यून् त्रीणि व्रता विदथे अन्तर् एषाम् ।
ऋतेनादित्या महि वो महित्वं तद् अर्यमन् वरुण मित्र चारु ॥ २ ०२७ ०८
त्री रोचना दिव्या धारयन्त हिरण्ययाः शुचयो धारपूताः ।
अस्वप्नजो अनिमिषा अदब्धा उरुशंसा ऋजवे मर्त्याय ॥ २ ०२७ ०९
त्वं विश्वेषां वरुणासि राजा ये च देवा असुर ये च मर्ताः ।
शतं नो रास्व शरदो विचक्षे ऽश्यामायूंषि सुधितानि पूर्वा ॥ २ ०२७ १०
न दक्षिणा वि चिकिते न सव्या न प्राचीनम् आदित्या नोत पश्चा ।
पाक्या चिद् वसवो धीर्या चिद् युष्मानीतो अभयं ज्योतिर् अश्याम् ॥ २ ०२७ ११
यो राजभ्य ऋतनिभ्यो ददाश यं वर्धयन्ति पुष्टयश् च नित्याः ।
स रेवान् याति प्रथमो रथेन वसुदावा विदथेषु प्रशस्तः ॥ २ ०२७ १२
शुचिर् अपः सूयवसा अदब्ध उप क्षेति वृद्धवयाः सुवीरः ।
नकिष् टं घ्नन्त्य् अन्तितो न दूराद् य आदित्यानाम् भवति प्रणीतौ ॥ २ ०२७ १३
अदिते मित्र वरुणोत मृळ यद् वो वयं चकृमा कच् चिद् आगः ।
उर्व् अश्याम् अभयं ज्योतिर् इन्द्र मा नो दीर्घा अभि नशन् तमिस्राः ॥ २ ०२७ १४
उभे अस्मै पीपयतः समीची दिवो वृष्टिं सुभगो नाम पुष्यन् ।
उभा क्षयाव् आजयन् याति पृत्सूभाव् अर्धौ भवतः साधू अस्मै ॥ २ ०२७ १५
या वो माया अभिद्रुहे यजत्राः पाशा आदित्या रिपवे विचृत्ताः ।
अश्वीव ताँ अति येषं रथेनारिष्टा उराव् आ शर्मन् स्याम ॥ २ ०२७ १६

माहम् मघोनो वरुण प्रियस्य भूरिदाव्न आ विदं शूनम् आपेः ।
मा रायो राजन् सुयमाद् अव स्थाम् बृहद् वदेम विदथे सुवीराः ॥ २ ०२७ १७

(२१९)
इदं कवेर् आदित्यस्य स्वराजो विश्वानि सान्त्य् अभ्य् अस्तु मह्ना ।
अति यो मन्द्रो यजथाय देवः सुकीर्तिम् भिक्षे वरुणस्य भूरेः ॥ २ ०२८ ०१
तव व्रते सुभगासः स्याम स्वाध्यो वरुण तुष्टुवांसः ।
उपायन उषसां गोमतीनाम् अग्नयो न जरमाणा अनु द्यून् ॥ २ ०२८ ०२
तव स्याम पुरुवीरस्य शर्मन्न् उरुशंसस्य वरुण प्रणेतः ।
यूयं नः पुत्रा अदितेर् अदब्धा अभि क्षमध्वं युज्याय देवाः ॥ २ ०२८ ०३
प्र सीम् आदित्यो असृजद् विधर्ताँ ऋतं सिन्धवो वरुणस्य यन्ति ।
न श्राम्यन्ति न वि मुचन्त्य् एते वयो न पप्तू रघुया परिज्मन् ॥ २ ०२८ ०४
वि मच् छ्रथाय रशनाम् इवाग ऋध्याम ते वरुण खाम् ऋतस्य ।
मा तन्तुश् छेदि वयतो धियम् मे मा मात्रा शार्य् अपसः पुर ऋतोः ॥ २ ०२८ ०५
अपो सु म्यक्ष वरुण भियसम् मत् सम्राळ् ऋतावो ऽनु मा गृभाय ।
दामेव वत्साद् वि मुमुग्ध्य् अंहो नहि त्वद् आरे निमिषश् चनेशे ॥ २ ०२८ ०६
मा नो वधैर् वरुण ये त इष्टाव् एनः कृण्वन्तम् असुर भ्रीणन्ति ।
मा ज्योतिषः प्रवसथानि गन्म वि षू मृधः शिश्रथो जीवसे नः ॥ २ ०२८ ०७
नमः पुरा ते वरुणोत नूनम् उतापरं तुविजात ब्रवाम ।
त्वे हि कम् पर्वते न श्रितान्य् अप्रच्युतानि दूळभ व्रतानि ॥ २ ०२८ ०८
परा ऋणा सावीर् अध मत्कृतानि माहं राजन्न् अन्यकृतेन भोजम् ।
अव्युष्टा इन् नु भूयसीर् उषास आ नो जीवान् वरुण तासु शाधि ॥ २ ०२८ ०९
यो मे राजन् युज्यो वा सखा वा स्वप्ने भयम् भीरवे मह्यम् आह ।
स्तेनो वा यो दिप्सति नो वृको वा त्वं तस्माद् वरुण पाह्य् अस्मान् ॥ २ ०२८ १०
माहम् मघोनो वरुण प्रियस्य भूरिदाव्न आ विदं शूनम् आपेः ।
मा रायो राजन् सुयमाद् अव स्थाम् बृहद् वदेम विदथे सुवीराः ॥ २ ०२८ ११

(२२०)
धृतव्रता आदित्या इषिरा आरे मत् कर्त रहसूर् इवागः ।
शृण्वतो वो वरुण मित्र देवा भद्रस्य विद्वाँ अवसे हुवे वः ॥ २ ०२९ ०१
यूयं देवाः प्रमतिर् यूयम् ओजो यूयं द्वेषांसि सनुतर् युयोत ।
अभिक्षत्तारो अभि च क्षमध्वम् अद्या च नो मृळयतापरं च ॥ २ ०२९ ०२
किम् ऊ नु वः कृणवामापरेण किं सनेन वसव आप्येन ।
यूयं नो मित्रावरुणादिते च स्वस्तिम् इन्द्रामरुतो दधात ॥ २ ०२९ ०३
हये देवा यूयम् इद् आपय स्थ ते मृळत नाधमानाय मह्यम् ।
मा वो रथो मध्यमवाळ् ऋते भून् मा युष्मावत्स्व् आपिषु श्रमिष्म ॥ २ ०२९ ०४
प्र व एको मिमय भूर्य् आगो यन् मा पितेव कितवं शशास ।
आरे पाशा आरे अघानि देवा मा माधि पुत्रे विम् इव ग्रभीष्ट ॥ २ ०२९ ०५
अर्वाञ्चो अद्या भवता यजत्रा आ वो हार्दि भयमानो व्ययेयम् ।
त्राध्वं नो देवा निजुरो वृकस्य त्राध्वं कर्ताद् अवपदो यजत्राः ॥ २ ०२९ ०६
माहम् मघोनो वरुण प्रियस्य भूरिदाव्न आ विदं शूनम् आपेः ।
मा रायो राजन् सुयमाद् अव स्थाम् बृहद् वदेम विदथे सुवीराः ॥ २ ०२९ ०७

(२२१)
ऋतं देवाय कृण्वते सवित्र इन्द्रायाहिघ्ने न रमन्त आपः ।
अहर्-अहर् यात्य् अक्तुर् अपां कियात्य् आ प्रथमः सर्ग आसाम् ॥ २ ०३० ०१
यो वृत्राय सिनम् अत्राभरिष्यत् प्र तं जनित्री विदुष उवाच ।
पथो रदन्तीर् अनु जोषम् अस्मै दिवे-दिवे धुनयो यन्त्य् अर्थम् ॥ २ ०३० ०२
ऊर्ध्वो ह्य् अस्थाद् अध्य् अन्तरिक्षे ऽधा वृत्राय प्र वधं जभार ।
मिहं वसान उप हीम् अदुद्रोत् तिग्मायुधो अजयच् छत्रुम् इन्द्रः ॥ २ ०३० ०३
बृहस्पते तपुषाश्नेव विध्य वृकद्वरसो असुरस्य वीरान् ।
यथा जघन्थ धृषता पुरा चिद् एवा जहि शत्रुम् अस्माकम् इन्द्र ॥ २ ०३० ०४
अव क्षिप दिवो अश्मानम् उच्चा येन शत्रुम् मन्दसानो निजूर्वाः ।

तो॒कस्य॑ सा॒तौ तन॑यस्य॒ भूरे॑र् अ॒स्माँ अ॒र्धं कृ॑णुताद् इन्द्र॒ गोना॑म् ॥ २ ०३० ०५
प्र हि क्रतुं॑ वृ॒हथो॒ यं व॑नु॒थो र॒ध्रस्य॑ स्थो॒ यज॑मानस्य चो॒दौ ।
इन्द्रा॑सोमा यु॒वम् अ॒स्माँ अ॑विष्टम् अ॒स्मिन् भ॒यस्थे॑ कृणुतम् उलो॒कम् ॥ २ ०३० ०६
न मा॑ तम॒न् न श्र॑म॒न् नोत त॑न्द्र॒न् न वो॑चाम॒ मा सु॑नो॒तेति॒ सोम॑म् ।
यो मे॑ पृ॒णाद् यो दद॒द् यो नि॒बोधा॒द् यो मा॑ सु॒न्वन्त॒म् उप॒ गोभि॒र् आय॑त् ॥ २ ०३० ०७
सर॑स्वति॒ त्वम् अ॒स्माँ अ॑विड्ढि म॒रुत्व॑ती धृष॒ती जे॑षि॒ शत्रू॑न् ।
त्यं चि॒च् छर्ध॑न्तं तविषी॒यमा॑ण॒म् इन्द्रो॑ हन्ति वृष॒भं शण्डि॑कानाम् ॥ २ ०३० ०८
यो नः॒ सनु॑त्य उ॒त वा॑ जिघ॒त्नुर् अ॑भि॒ख्याय॒ तं ति॑गि॒तेन॑ विध्य ।
बृह॑स्पत॒ आयु॑धैर् जेषि॒ शत्रू॑न् द्रु॒हे रीष॑न्त॒म् परि॑ धेहि राजन् ॥ २ ०३० ०९
अ॒स्माके॑भिः॒ सत्व॑भिः शूर॒ शूरै॑र् वी॒र्या॑ कृधि॒ यानि॑ ते॒ कर्त्वा॑नि ।
ज्योग् अ॑भूव॒न्न् अनु॑धूपितासो ह॒त्वी तेषा॒म् आ भ॑रा नो॒ वसू॑नि ॥ २ ०३० १०
तं वः॒ शर्ध॒म् मारु॑तं सुम्न॒युर् गि॒रोप॑ ब्रुवे॒ नम॑सा॒ दैव्यं॒ जन॑म् ।
यथा॑ र॒यिं सर्व॑वीरं॒ नशा॑महा अपत्य॒साचं॒ श्रुत्यं॑ दि॒वे-दि॑वे ॥ २ ०३० ११

(२२२)
अ॒स्माक॑म् मित्रावरुणावतं॒ रथ॑म् आदि॒त्यै रु॒द्रैर् वसु॑भिः सचा॒भुवा॑ ।
प्र यद् वयो॒ न पप्त॒न् वस्म॑न॒स् परि॑ श्रव॒स्यवो॒ हृषी॑वन्तो व॒नर्ष॑दः ॥ २ ०३१ ०१
अध॑ स्मा न॒ उद् अ॑वता सजोषसो॒ रथं॑ देवासो अ॒भि वि॒क्षु वा॑ज॒युम् ।
यद् आ॒शवः॒ पद्या॑भि॒स् तित्र॑तो॒ रजः॑ पृथि॒व्याः सानौ॒ जङ्घ॑नन्त पा॒णिभिः॑ ॥ २ ०३१ ०२
उ॒त स्य न॒ इन्द्रो॑ वि॒श्वच॑र्षणिर् दि॒वः शर्धे॑न॒ मारु॑तेन सु॒क्रतुः॑ ।
अनु॒ नु स्था॑त्य् अवृ॒काभि॑र् ऊ॒तिभी॒ रथ॑म् म॒हे स॒नये॒ वाज॑सातये ॥ २ ०३१ ०३
उ॒त स्य दे॒वो भुव॑नस्य स॒क्षणि॒स् त्वष्टा॒ ग्नाभिः॑ स॒जोषा॑ जूजुव॒द् रथ॑म् ।
इ॒ळा भगो॑ बृहद्दि॒वोत रोद॑सी पू॒षा पुरं॑धिर् अ॒श्विना॒व् अधा॒ पती॑ ॥ २ ०३१ ०४
उ॒त त्ये दे॒वी सु॒भगे॑ मिथू॒दृशो॒षासा॒नक्ता॒ जग॑ताम् अपी॒जुवा॑ ।
स्तु॒षे यद् वा॑म् पृथिवि॒ नव्य॑सा॒ वच॑ स्था॒तुश् च॒ वय॒स् त्रिव॑या उप॒स्तिरे॑ ॥ २ ०३१ ०५
उ॒त वः॒ शंस॑म् उ॒शिजा॑म् इव श्म॒स्य् अहि॑र् बु॒ध्न्यो॒ ऽज एक॑पाद् उ॒त ।
त्रि॒त ऋ॑भु॒क्षाः स॑वि॒ता चनो॑ दधे॒ ऽपां नपा॑द् आशु॒हेमा॑ धि॒या शमि॑ ॥ २ ०३१ ०६

ए॒ता वो॑ व॒श्म्य् उद्य॑ता यजत्रा॒ अत॑क्षन्न् आ॒यवो॒ नव्य॑से॒ सम् ।
श्र॒व॒स्यवो॒ वाजं॑ चका॒नाः सप्ति॒र् न रथ्यो॒ अह॑ धी॒तिम् अ॑श्याः ॥ २ ०३१ ०७

(२२३)
अ॒स्य मे॑ द्यावापृथिवी ऋताय॒तो भू॒तम् अ॑वि॒त्री वच॑सः सिषा॑सतः ।
ययो॒र् आयुः॑ प्रत॒रं ते इ॒दम् पु॒र उप॑स्तुते वसू॒युर् वा॑म् म॒हो द॑धे ॥ २ ०३२ ०१
मा नो॒ गुह्या॒ रिप॑ आ॒योर् अह॑न् दभ॒न् मा न॑ आ॒भ्यो री॑रधो दु॒च्छुना॑भ्यः ।
मा नो॒ वि यौः॑ स॒ख्या वि॒द्धि तस्य॑ नः सुम्नाय॒ता मन॑सा॒ तत् त्वे॑महे ॥ २ ०३२ ०२
अहे॑ळता॒ मन॑सा श्रु॒ष्टिम् आ व॑ह॒ दुहा॑नां धे॒नुम् पि॒प्युषी॑म् अस॒श्चत॑म् ।
पद्या॑भिर् आ॒शुं वच॑सा च वा॒जिनं॑ त्वां हि॑नोमि पुरुहूत वि॒श्वहा॑ ॥ २ ०३२ ०३
रा॒काम् अ॒हं सु॒हवां॑ सुष्टु॒ती हु॑वे शृ॒णोतु॑ नः सु॒भगा॒ बोध॑तु॒ त्मना॑ ।
सीव्य॒त्व् अपः॑ सू॒च्याच्छि॑द्यमानया॒ ददा॑तु वी॒रं श॒तदा॑यम् उ॒क्थ्य॑म् ॥ २ ०३२ ०४
यास् ते॑ राके सुम॒तयः॑ सु॒पेश॑सो॒ याभि॒र् ददा॑सि दा॒शुषे॒ वसू॑नि ।
ताभि॑र् नो अ॒द्य सु॒मना॑ उ॒पाग॑हि सहस्रपो॒षं सु॑भगे॒ ररा॑णा ॥ २ ०३२ ०५
सिनी॑वालि॒ पृथु॑ष्टुके॒ या दे॒वाना॒म् असि॒ स्वसा॑ ।
जु॒षस्व॑ ह॒व्यम् आहु॑तम् प्र॒जां दे॑वि दिदिड्ढि नः ॥ २ ०३२ ०६
या सु॑बा॒हुः स्व॑ङ्गु॒रिः सु॒षूमा॑ बहु॒सूव॑री ।
तस्यै॑ वि॒श्पत्न्यै॑ ह॒विः सि॑नीवा॒ल्यै जु॑होतन ॥ २ ०३२ ०७
या गु॒ङ्गूर् या सि॑नीवा॒ली या रा॒का या सर॑स्वती ।
इ॒न्द्रा॒णीम् अ॑ह्व ऊ॒तये॑ वरुणा॒नीं स्व॒स्तये॑ ॥ २ ०३२ ०८

(२२४)
आ ते॑ पितर् मरुतां सु॒म्नम् ए॑तु॒ मा नः॒ सूर्य॑स्य सं॒दृशो॑ युयोथाः ।
अ॒भि नो॑ वी॒रो अर्व॑ति क्षमेत॒ प्र जा॑येमहि रुद्र प्र॒जाभिः॑ ॥ २ ०३३ ०१
त्वाद॑त्तेभी रुद्र॒ शंत॑मेभिः श॒तं हिमा॑ अशीय भेष॒जेभिः॑ ।
व्य् अ॒१॒स्मद् द्वेषो॑ वित॒रं व्य् अंहो॒ व्य् अमी॑वाश् चातयस्वा॒ विषू॑चीः ॥ २ ०३३ ०२

श्रेष्ठो जातस्य रुद्र श्रियासि तवस्तमस् तवसा वज्रबाहो ।
पर्षि णः पारम् अंहसः स्वस्ति विश्वा अभीती रपसो युयोधि ॥ २ ०३३ ०३
मा त्वा रुद्र चुक्रुधामा नमोभिर् मा दुष्टुती वृषभ मा सहूती ।
उन् नो वीराँ अर्पय भेषजेभिर् भिषक्तमं त्वा भिषजां शृणोमि ॥ २ ०३३ ०४
हवीमभिर् हवते यो हविर्भिर् अव स्तोमेभी रुद्रं दिषीय ।
ऋदूदरः सुहवो मा नो अस्यै बभ्रुः सुशिप्रो रीरधन् मनायै ॥ २ ०३३ ०५
उन् मा ममन्द वृषभो मरुत्वान् त्वक्षीयसा वयसा नाधमानम् ।
घृणीव छायाम् अरपा अशीया विवासेयं रुद्रस्य सुम्नम् ॥ २ ०३३ ०६
क्व१ स्य ते रुद्र मृळयाकुर् हस्तो यो अस्ति भेषजो जलाषः ।
अपभर्ता रपसो दैव्यस्याभी नु मा वृषभ चक्षमीथाः ॥ २ ०३३ ०७
प्र बभ्रवे वृषभाय श्वितीचे महो महीं सुष्टुतिम् ईरयामि ।
नमस्या कल्मलीकिनं नमोभिर् गृणीमसि त्वेषं रुद्रस्य नाम ॥ २ ०३३ ०८
स्थिरेभिर् अङ्गैः पुरुरूप उग्रो बभ्रुः शुक्रेभिः पिपिशे हिरण्यैः ।
ईशानाद् अस्य भुवनस्य भूरेर् न वा उ योषद् रुद्राद् असुर्यम् ॥ २ ०३३ ०९
अर्हन् बिभर्षि सायकानि धन्वार्हन् निष्कं यजतं विश्वरूपम् ।
अर्हन्न् इदं दयसे विश्वम् अभ्वं न वा ओजीयो रुद्र त्वद् अस्ति ॥ २ ०३३ १०
स्तुहि श्रुतं गर्तसदं युवानम् मृगं न भीमम् उपहत्नुम् उग्रम् ।
मृळा जरित्रे रुद्र स्तवानो ऽन्यं ते अस्मन् नि वपन्तु सेनाः ॥ २ ०३३ ११
कुमारश् चित् पितरं वन्दमानम् प्रति नानाम रुद्रोपयन्तम् ।
भूरेर् दातारं सत्पतिं गृणीषे स्तुतस् त्वम् भेषजा रास्य् अस्मे ॥ २ ०३३ १२
या वो भेषजा मरुतः शुचीनि या शंतमा वृषणो या मयोभु ।
यानि मनुर् अवृणीता पिता नस् ता शं च योश् च रुद्रस्य वश्मि ॥ २ ०३३ १३
परि णो हेती रुद्रस्य वृज्याः परि त्वेषस्य दुर्मतिर् मही गात् ।
अव स्थिरा मघवद्भ्यस् तनुष्व मीढ्वस् तोकाय तनयाय मृळ ॥ २ ०३३ १४
एवा बभ्रो वृषभ चेकितान यथा देव न हृणीषे न हंसि ।
हवनश्रुन् नो रुद्रेह बोधि बृहद् वदेम विदथे सुवीराः ॥ २ ०३३ १५

(२२५)
धारावरा मरुतो धृष्ण्वोजसो मृगा न भीमास् तविषीभिर् अर्चिनः ।
अग्नयो न शुशुचाना ऋजीषिणो भृमिं धमन्तो अप गा अवृण्वत ॥ २ ०३४ ०१
द्यावो न स्तृभिश् चितयन्त खादिनो व्य् अ १ भ्रिया न द्युतयन्त वृष्टयः ।
रुद्रो यद् वो मरुतो रुक्मवक्षसो वृषाजनि पृश्न्याः शुक्र ऊधनि ॥ २ ०३४ ०२
उक्षन्ते अश्वाँ अत्याँ इवाजिषु नदस्य कर्णैस् तुरयन्त आशुभिः ।
हिरण्यशिप्रा मरुतो दविध्वतः पृक्षं याथ पृषतीभिः समन्यवः ॥ २ ०३४ ०३
पृक्षे ता विश्वा भुवना ववक्षिरे मित्राय वा सदम् आ जीरदानवः ।
पृषदश्वासो अनवभ्रराधस ऋजिप्यासो न वयुनेषु धूर्षदः ॥ २ ०३४ ०४
इन्धन्वभिर् धेनुभी रप्शदूधभिर् अध्वस्मभिः पथिभिर् भ्राजदृष्टयः ।
आ हंसासो न स्वसराणि गन्तन मधोर् मदाय मरुतः समन्यवः ॥ २ ०३४ ०५
आ नो ब्रह्माणि मरुतः समन्यवो नरां न शंसः सवनानि गन्तन ।
अश्वाम् इव पिप्यत धेनुम् ऊधनि कर्ता धियं जरित्रे वाजपेशसम् ॥ २ ०३४ ०६
तं नो दात मरुतो वाजिनं रथ आपानम् ब्रह्म चितयद् दिवे-दिवे ।
इषं स्तोतृभ्यो वृजनेषु कारवे सनिम् मेधाम् अरिष्टं दुष्टरं सहः ॥ २ ०३४ ०७
यद् युञ्जते मरुतो रुक्मवक्षसो ऽश्वान् रथेषु भग आ सुदानवः ।
धेनुर् न शिश्वे स्वसरेषु पिन्वते जनाय रातहविषे महीम् इषम् ॥ २ ०३४ ०८
यो नो मरुतो वृकताति मर्त्यो रिपुर् दधे वसवो रक्षता रिषः ।
वर्तयत तपुषा चक्रियाभि तम् अव रुद्रा अशसो हन्तना वधः ॥ २ ०३४ ०९
चित्रं तद् वो मरुतो याम चेकिते पृश्न्या यद् ऊधर् अप्य् आपयो दुहुः ।
यद् वा निदे नवमानस्य रुद्रियास् त्रितं जराय जुरताम् अदाभ्याः ॥ २ ०३४ १०
तान् वो महो मरुत एवयाव्नो विष्णोर् एषस्य प्रभृथे हवामहे ।
हिरण्यवर्णान् ककुहान् यतस्रुचो ब्रह्मण्यन्तः शंस्यं राध ईमहे ॥ २ ०३४ ११
ते दशग्वाः प्रथमा यज्ञम् ऊहिरे ते नो हिन्वन्तूषसो व्युष्टिषु ।
उषा न रामीर् अरुणैर् अपोर्णुते महो ज्योतिषा शुचता गोअर्णसा ॥ २ ०३४ १२
ते क्षोणीभिर् अरुणेभिर् नाञ्जिभी रुद्रा ऋतस्य सदनेषु वावृधुः ।
निमेघमाना अत्येन पाजसा सुश्चन्द्रं वर्णं दधिरे सुपेशसम् ॥ २ ०३४ १३
ताँ इयानो महि वरूथम् ऊतय उप घेद् एना नमसा गृणीमसि ।

त्रितो न यान् पञ्च होतॄन् अभिष्टय आववर्तद् अवराञ् चक्रियावसे ॥ २ ०३४ १४
यया रध्रम् पारयथात्य् अंहो यया निदो मुञ्चथ वन्दितारम् ।
अर्वाची सा मरुतो या व ऊतिर् ओ षु वाश्रेव सुमतिर् जिगातु ॥ २ ०३४ १५

(२२६)
उपेम् असृक्षि वाजयुर् वचस्यां चनो दधीत नाद्यो गिरो मे ।
अपां नपाद् आशुहेमा कुवित् स सुपेशसस् करति जोषिषद् धि ॥ २ ०३५ ०१
इमं स्व् अस्मै हृद आ सुतष्टम् मन्त्रं वोचेम कुविद् अस्य वेदत् ।
अपां नपाद् असुर्यस्य मह्ना विश्वान्य् अर्यो भुवना जजान ॥ २ ०३५ ०२
सम् अन्या यन्त्य् उप यन्त्य् अन्याः समानम् ऊर्वं नद्यः पृणन्ति ।
तम् ऊ शुचिं शुचयो दीदिवांसम् अपां नपातम् परि तस्थुर् आपः ॥ २ ०३५ ०३
तम् अस्मेरा युवतयो युवानम् मर्मृज्यमानाः परि यन्त्य् आपः ।
स शुक्रेभिः शिक्वभी रेवद् अस्मे दीदायानिध्मो घृतनिर्णिग् अप्सु ॥ २ ०३५ ०४
अस्मै तिस्रो अव्यथ्याय नारीर् देवाय देवीर् दिधिषन्त्य् अन्नम् ।
कृता इवोप हि प्रसर्स्रे अप्सु स पीयूषं धयति पूर्वसूनाम् ॥ २ ०३५ ०५
अश्वस्यात्र जनिमास्य च स्वर् द्रुहो रिषः सम्पृचः पाहि सूरीन् ।
आमासु पूर्षु परो अप्रमृष्यं नारातयो वि नशन् नानृतानि ॥ २ ०३५ ०६
स्व आ दमे सुदुघा यस्य धेनुः स्वधाम् पीपाय सुभ्व् अन्नम् अत्ति ।
सो अपां नपाद् ऊर्जयन्न् अप्स्व् अ १ न्तर् वसुदेयाय विधते वि भाति ॥ २ ०३५ ०७
यो अप्स्व् आ शुचिना दैव्येन ऋतावाजस्र उर्विया विभाति ।
वया इद् अन्या भुवनान्य् अस्य प्र जायन्ते वीरुधश् च प्रजाभिः ॥ २ ०३५ ०८
अपां नपाद् आ ह्य् अस्थाद् उपस्थं जिह्मानाम् ऊर्ध्वो विद्युतं वसानः ।
तस्य ज्येष्ठम् महिमानं वहन्तीर् हिरण्यवर्णाः परि यन्ति यह्वीः ॥ २ ०३५ ०९
हिरण्यरूपः स हिरण्यसंदृग् अपां नपात् सेद् उ हिरण्यवर्णः ।
हिरण्ययात् परि योनेर् निषद्या हिरण्यदा ददत्य् अन्नम् अस्मै ॥ २ ०३५ १०
तद् अस्यानीकम् उत चारु नामापीच्यं वर्धते नप्तुर् अपाम् ।
यम् इन्धते युवतयः सम् इत्था हिरण्यवर्णं घृतम् अन्नम् अस्य ॥ २ ०३५ ११

अस्मै बहूनाम् अवमाय सख्ये यज्ञैर् विधेम नमसा हविर्भिः ।
सं सानु मार्ज्मि दिधिषामि बिल्मैर् दधाम्य् अन्नैः परि वन्द ऋग्भिः ॥ २ ०३५ १२
स ई वृषाजनयत् तासु गर्भं स ई शिशुर् धयति तं रिहन्ति ।
सो अपां नपाद् अनभिम्लातवर्णो ऽन्यस्येवेह तन्वा विवेष ॥ २ ०३५ १३
अस्मिन् पदे परमे तस्थिवांसम् अध्वस्मभिर् विश्वहा दीदिवांसम् ।
आपो नप्त्रे घृतम् अन्नं वहन्तीः स्वयम् अत्कैः परि दीयन्ति यह्वीः ॥ २ ०३५ १४
अयांसम् अग्ने सुक्षितिं जनायायांसम् उ मघवद्भ्यः सुवृक्तिम् ।
विश्वं तद् भद्रं यद् अवन्ति देवा बृहद् वदेम विदथे सुवीराः ॥ २ ०३५ १५

(२२७)
तुभ्यं हिन्वानो वसिष्ट गा अपो ऽधुक्षन् सीम् अविभिर् अद्रिभिर् नरः ।
पिबेन्द्र स्वाहा प्रहुतं वषट्कृतं होत्राद् आ सोमम् प्रथमो य ईशिषे ॥ २ ०३६ ०१
यज्ञैः सम्मिश्लाः पृषतीभिर् ऋष्टिभिर् यामञ् छुभ्रासो अञ्जिषु प्रिया उत ।
आसद्या बर्हिर् भरतस्य सूनवः पोत्राद् आ सोमम् पिबता दिवो नरः ॥ २ ०३६ ०२
अमेव नः सुहवा आ हि गन्तन नि बर्हिषि सदतना रणिष्टन ।
अथा मन्दस्व जुजुषाणो अन्धसस् त्वष्टर् देवेभिर् जनिभिः सुमद्गणः ॥ २ ०३६ ०३
आ वक्षि देवाꣳ इह विप्र यक्षि चोशन् होतर् नि षदा योनिषु त्रिषु ।
प्रति वीहि प्रस्थितं सोम्यम् मधु पिबाग्नीध्रात् तव भागस्य तृप्णुहि ॥ २ ०३६ ०४
एष स्य ते तन्वो नृम्णवर्धनः सह ओजः प्रदिवि बाह्वोर् हितः ।
तुभ्यं सुतो मघवन् तुभ्यम् आभृतस् त्वम् अस्य ब्राह्मणाद् आ तृपत् पिब ॥ २ ०३६ ०५
जुषेथां यज्ञम् बोधतं हवस्य मे सत्तो होता निविदः पूर्व्या अनु ।
अच्छा राजाना नम एत्य् आवृतम् प्रशास्त्राद् आ पिबतं सोम्यम् मधु ॥ २ ०३६ ०६

(२२८)
मन्दस्व होत्राद् अनु जोषम् अन्धसो ऽध्वर्यवः स पूर्णां वष्ट्य् आसिचम् ।
तस्मा एतम् भरत तद्वशो ददिर् होत्राद् सोमं द्रविणोदः पिब ऋतुभिः ॥ २ ०३७ ०१

यम् उ पूर्वम् अहुवे तम् इदं हुवे सेद् उ हव्यो ददिर् यो नाम पत्यते ।
अध्वर्युभिः प्रस्थितं सोम्यम् मधु पोत्रात् सोमं द्रविणोदः पिब ऋतुभिः ॥ २ ०३७ ०२
मेद्यन्तु ते वह्नयो येभिर् ईयसे ऽरिषण्यन् वीळयस्वा वनस्पते ।
आयूया धृष्णो अभिगूर्या त्वं नेष्ट्रात् सोमं द्रविणोदः पिब ऋतुभिः ॥ २ ०३७ ०३
अपाद् धोत्राद् उत पोत्राद् अमत्तोत नेष्ट्राद् अजुषत प्रयो हितम् ।
तुरीयम् पात्रम् अमृक्तम् अमर्त्यं द्रविणोदाः पिबतु द्राविणोदसः ॥ २ ०३७ ०४
अर्वाञ्चम् अद्य यय्यं नृवाहणं रथं युञ्जाथाम् इह वां विमोचनम् ।
पृङ्क्तं हवींषि मधुना हि कं गतम् अथा सोमम् पिबतं वाजिनीवसू ॥ २ ०३७ ०५
जोष्य् अग्ने समिधं जोष्य् आहुतिं जोषि ब्रह्म जन्यं जोषि सुष्टुतिम् ।
विश्वेभिर् विश्वाँ ऋतुना वसो मह उशन् देवाँ उशतः पायया हविः ॥ २ ०३७ ०६

(२२९)
उद् उ ष्य देवः सविता सवाय शश्वत्तमं तदपा वह्निर् अस्थात् ।
नूनं देवेभ्यो वि हि धाति रत्नम् अथाभजद् वीतिहोत्रं स्वस्तौ ॥ २ ०३८ ०१
विश्वस्य हि श्रुष्टये देव ऊर्ध्वः प्र बाहवा पृथुपाणिः सिसर्ति ।
आपश् चिद् अस्य व्रत आ निमृग्रा अयं चिद् वातो रमते परिज्मन् ॥ २ ०३८ ०२
आशुभिश् चिद् यान् वि मुचाति नूनम् अरीरमद् अतमानं चिद् एतोः ।
अह्यर्षूणां चिन् न्य् अयाँ अविष्याम् अनु व्रतं सवितुर् मोक्य् आगात् ॥ २ ०३८ ०३
पुनः सम् अव्यद् विततं वयन्ती मध्या कर्तोर् न्य् अधाच् छक्म धीरः ।
उत् संहायास्थाद् व्य् ऋतूँर् अदर्धर् अरमतिः सविता देव आगात् ॥ २ ०३८ ०४
नानौकांसि दुर्यो विश्वम् आयुर् वि तिष्ठते प्रभवः शोको अग्नेः ।
ज्येष्ठम् माता सूनवे भागम् आधाद् अन्व् अस्य केतम् इषितं सवित्रा ॥ २ ०३८ ०५
समाववर्ति विष्ठितो जिगीषुर् विश्वेषां कामश् चरताम् अमाभूत् ।
शश्वाँ अपो विकृतं हित्व्य् आगाद् अनु व्रतं सवितुर् दैव्यस्य ॥ २ ०३८ ०६
त्वया हितम् अप्यम् अप्सु भागं धन्वान्व् आ मृगयसो वि तस्थुः ।
वनानि विभ्यो नकिर् अस्य तानि व्रता देवस्य सवितुर् मिनन्ति ॥ २ ०३८ ०७
याद्राध्यं वरुणो योनिम् अप्यम् अनिशितं निमिषि जर्भुराणः ।

विश्वो॑ मार्ता॒ण्डो व्र॒जम् आ प॒शुर् गा॑त् स्थ॒शो जन्मा॑नि सवि॒ता व्य् आकः॑ ॥ २ ०३८ ०८
न यस्येन्द्रो॒ वरु॑णो॒ न मि॒त्रो व्र॒तम् अ॑र्य॒मा न मि॒नन्ति॑ रु॒द्रः ।
नारा॑तय॒स् तम् इ॒दं स्व॒स्ति हु॒वे दे॒वं स॑वि॒तारं॒ नमो॑भिः ॥ २ ०३८ ०९
भगं॒ धियं॑ वा॒जय॑न्तः॒ पुरं॑धिं॒ नरा॒शंसो॒ ग्नास्पति॑र् नो अव्याः ।
आ॒ये वा॒मस्य॑ संग॒थे र॑यी॒णाम् प्रि॒या दे॒वस्य॑ सवि॒तुः स्या॑म ॥ २ ०३८ १०
अ॒स्मभ्यं॒ तद् दि॒वो अ॒द्भ्यः पृ॑थि॒व्यास् त्वया॑ द॒त्तं काम्यं॒ राध॒ आ गा॑त् ।
शं यत् स्तो॒तृभ्य॑ आ॒पये॒ भवा॑त्य् उरु॒शंसा॑य सवितर् जरि॒त्रे ॥ २ ०३८ ११

(२३०)
ग्रावा॑णेव॒ तद् इद् अर्थं॑ जरेथे॒ गृध्रे॑व वृ॒क्षं नि॑धि॒मन्त॒म् अच्छ॑ ।
ब्र॒ह्माणे॑व वि॒दथ॑ उक्थ॒शासा॑ दू॒तेव॒ हव्या॒ जन्या॑ पुरु॒त्रा ॥ २ ०३९ ०१
प्रा॒त॒र्यावा॑णा र॒थ्ये॑व वी॒राजे॑व य॒मा वर॒म् आ स॑चेथे ।
मेने॑ इव त॒न्वा॒ ३॑ शुम्भ॑माने॒ दम्प॑तीव क्रतु॒विदा॒ जने॑षु ॥ २ ०३९ ०२
शृङ्गे॑व नः प्रथ॒मा ग॑न्तम् अ॒र्वाक् छ॒फाव् इ॑व॒ जर्भु॑राणा॒ तरो॑भिः ।
च॒क्र॒वा॒केव॒ प्रति॒ वस्तो॑र् उस्रा॒र्वाञ्चा॑ यातं र॒थ्ये॑व शक्रा ॥ २ ०३९ ०३
ना॒वेव॑ नः पारयतं यु॒गेव॒ नभ्ये॑व न उप॒धीव॑ प्र॒धीव॑ ।
श्वाने॑व नो॒ अरि॑षण्या त॒नूनां॒ खृग॑लेव वि॒स्रसः॑ पातम् अ॒स्मान् ॥ २ ०३९ ०४
वाते॑वाजु॒र्या न॒द्ये॑व री॒तिर् अ॒क्षी इ॑व॒ चक्षु॒षा या॑तम् अ॒र्वाक् ।
हस्ता॑व् इव त॒न्वे॒ ३॑ शम्भ॑विष्ठा॒ पादे॑व नो नयतं॒ वस्यो॒ अच्छ॑ ॥ २ ०३९ ०५
ओष्ठा॑व् इव॒ मध्व् आ॒स्ने वद॑न्ता॒ स्तना॑व् इव पिप्यतं जी॒वसे॑ नः ।
नासे॑व नस् त॒न्वो रक्षि॒तारा॒ कर्णा॑व् इव सु॒श्रुता॑ भूतम् अ॒स्मे ॥ २ ०३९ ०६
हस्ते॑व श॒क्तिम् अ॒भि सं॑द॒दी नः॒ क्षामे॑व नः॒ सम् अ॑जतं॒ रजां॑सि ।
इ॒मा गिरो॑ अश्विना युष्म॒यन्तीः॒ क्ष्णोत्रे॑णेव॒ स्वधि॑तिं॒ सं शि॑शीतम् ॥ २ ०३९ ०७
ए॒तानि॑ वाम् अश्विना॒ वर्ध॑नानि॒ ब्रह्म॒ स्तोमं॑ गृत्सम॒दासो॑ अक्रन् ।
तानि॑ नरा जुजुषा॒णोप॑ यातम् बृ॒हद् व॑देम वि॒दथे॑ सु॒वीराः॑ ॥ २ ०३९ ०८

(२३१)
सोमा॑पूषणा॒ जन॑ना रयी॒णां जन॑ना दि॒वो जन॑ना पृथि॒व्याः ।
जा॒तौ विश्व॑स्य॒ भुव॑नस्य गो॒पौ दे॒वा अ॑कृण्वन्न् अ॒मृत॑स्य॒ नाभि॑म् ॥ २ ०४० ०१
इ॒मौ दे॒वौ जाय॑मानौ जुषन्ते॒मौ तमां॑सि गूहता॒म् अजु॑ष्टा ।
आ॒भ्याम् इन्द्रः॑ प॒क्वम् आ॒मास्व् अ॒न्तः सो॑मापू॒षभ्यां॑ जनद् उ॒स्रिया॑सु ॥ २ ०४० ०२
सोमा॑पूषणा॒ रज॑सो वि॒मानं॑ स॒प्तच॑क्रं॒ रथ॒म् अवि॑श्वमिन्वम् ।
वि॒षू॒वृत॒म् मन॑सा यु॒ज्यमा॑नं॒ तं जि॑न्वथो वृषणा॒ पञ्च॑रश्मिम् ॥ २ ०४० ०३
दि॒व्य् अ१॒॑न्यः सद॑नं च॒क्र उ॒च्चा पृ॑थि॒व्याम् अ॒न्यो अध्य् अ॒न्तरि॑क्षे ।
ताव् अ॒स्मभ्य॑म् पुरु॒वार॑म् पुरु॒क्षुं रा॒यस् पोषं॒ वि ष्य॑तां॒ नाभि॑म् अ॒स्मे ॥ २ ०४० ०४
विश्वा॑न्य् अ॒न्यो भुव॑ना ज॒जान॒ विश्व॑म् अ॒न्यो अ॑भि॒चक्षा॑ण एति ।
सोमा॑पूषणा॒व् अव॑तं॒ धिय॑म् मे यु॒वाभ्यां॒ विश्वाः॒ पृत॑ना जयेम ॥ २ ०४० ०५
धिय॑म् पू॒षा जि॑न्वतु विश्वमि॒न्वो र॒यिं सोमो॑ रयि॒पति॑र् दधातु ।
अव॑तु दे॒व्य् अदि॑तिर् अन॒र्वा बृ॒हद् व॑देम वि॒दथे॑ सु॒वीराः॑ ॥ २ ०४० ०६

(२३२)
वायो॒ ये ते॑ सह॒स्रिणो॒ रथा॑स॒स् तेभि॒र् आ ग॑हि ।
नि॒युत्वा॒न् सोम॑पीतये ॥ २ ०४१ ०१
नि॒युत्वा॑न् वाय॒व् आ ग॑ह्य् अ॒यं शु॒क्रो अ॑यामि ते ।
गन्ता॑सि सुन्व॒तो गृ॒हम् ॥ २ ०४१ ०२
शु॒क्रस्या॒द्य गवा॑शिर॒ इन्द्र॑वायू नि॒युत्व॑तः ।
आ या॑त॒म् पिब॑तं नरा ॥ २ ०४१ ०३
अ॒यं वा॑म् मित्रावरुणा सु॒तः सोम॑ ऋतावृधा ।
ममेद् इ॒ह श्रु॒तं हव॑म् ॥ २ ०४१ ०४
राजा॑नाव् अन॑भिद्रुहा ध्रु॒वे सद॑स्य् उत्त॒मे ।
स॒हस्र॑स्थूण आसाते ॥ २ ०४१ ०५
ता स॒म्राजा॑ घृ॒तासु॑ती आदि॒त्या दानु॑न॒स् पती॑ ।

सचेति अनवह्वरम् ॥ २ ०४१ ०६
गोमद् ऊ षु नासत्याश्वावद् यातम् अश्विना ।
वर्ती रुद्रा नृपाय्यम् ॥ २ ०४१ ०७
न यत् परो नान्तर आदधर्षद् वृषणवसू ।
दुःशंसो मर्त्यो रिपुः ॥ २ ०४१ ०८
ता न आ वोळ्हम् अश्विना रयिम् पिशङ्गसंदृशम् ।
धिष्ण्या वरिवोविदम् ॥ २ ०४१ ०९
इन्द्रो अङ्ग महद् भयम् अभी षद् अप चुच्यवत् ।
स हि स्थिरो विचर्षणिः ॥ २ ०४१ १०
इन्द्रश् च मृळयाति नो न नः पश्चाद् अघं नशत् ।
भद्रम् भवाति नः पुरः ॥ २ ०४१ ११
इन्द्र आशाभ्यस् परि सर्वाभ्यो अभयं करत् ।
जेता शत्रून् विचर्षणिः ॥ २ ०४१ १२
विश्वे देवास आ गत शृणुता म इमं हवम् ।
एदम् बर्हिर् नि षीदत ॥ २ ०४१ १३
तीव्रो वो मधुमाँ अयं शुनहोत्रेषु मत्सरः ।
एतम् पिबत काम्यम् ॥ २ ०४१ १४
इन्द्रज्येष्ठा मरुद्गणा देवासः पूषरातयः ।
विश्वे मम श्रुता हवम् ॥ २ ०४१ १५
अम्बितमे नदीतमे देवितमे सरस्वति ।
अप्रशस्ता इव स्मसि प्रशस्तिम् अम्ब नस् कृधि ॥ २ ०४१ १६
त्वे विश्वा सरस्वति श्रितायूंषि देव्याम् ।
शुनहोत्रेषु मत्स्व प्रजां देवि दिदिड्ढि नः ॥ २ ०४१ १७
इमा ब्रह्म सरस्वति जुषस्व वाजिनीवति ।
या ते मन्म गृत्समदा ऋतावरि प्रिया देवेषु जुह्वति ॥ २ ०४१ १८
प्रेतां यज्ञस्य शम्भुवा युवाम् इद् आ वृणीमहे ।
अग्निं च हव्यवाहनम् ॥ २ ०४१ १९
द्यावा नः पृथिवी इमं सिध्रम् अद्य दिविस्पृशम् ।

य॒ज्ञं दे॒वेषु॑ यच्छताम् ॥ २ ०४१ २०
आ वा॑म् उ॒पस्थ॑म् अद्रुहा दे॒वाः सी॑दन्तु य॒ज्ञियाः॑ ।
इ॒हाद्य सोम॑पीतये ॥ २ ०४१ २१

(२३३)
कनि॑क्रदज् ज॒नुष॑म् प्रब्रुवा॒ण इय॑र्ति॒ वाच॑म् अरि॒तेव॒ नाव॑म् ।
सु॒म॒ङ्गल॑श् च शकुने॒ भवा॑सि॒ मा त्वा॒ का चि॑द् अभि॒भा विश्व्या॑ विदत् ॥ २ ०४२ ०१
मा त्वा॑ श्ये॒न उद् व॑धी॒न् मा सु॑प॒र्णो मा त्वा॑ वि॒दद् इषु॑मान् वी॒रो अस्ता॑ ।
पित्र्या॒म् अनु॑ प्र॒दिशं॒ कनि॑क्रदत् सु॒म॒ङ्गलो॑ भद्रवा॒दी व॑दे॒ह ॥ २ ०४२ ०२
अव॑ क्रन्द दक्षिण॒तो गृ॒हाणां॑ सुम॒ङ्गलो॑ भद्रवा॒दी श॑कुन्ते ।
मा न॑ स्ते॒न ई॑शत॒ माघशं॑सो बृ॒हद् व॑देम वि॒दथे॑ सु॒वीराः॑ ॥ २ ०४२ ०३

(२३४)
प्र॒द॒क्षि॒णिद् अ॒भि गृ॑णन्ति का॒रवो॒ वयो॒ वद॑न्त ऋतु॒था श॒कुन्त॑यः ।
उ॒भे वाचौ॑ वदति साम॒गा इ॑व गाय॒त्रं च॒ त्रैष्टु॑भं॒ चानु॑ राजति ॥ २ ०४३ ०१
उ॒द्गा॒तेव॑ शकुने॒ साम॑ गायसि ब्रह्मपु॒त्र इ॑व॒ सव॑नेषु शंससि ।
वृषे॑व वा॒जी शिशु॑मतीर् अ॒पीत्या॑ स॒र्वतो॑ नः शकुने भ॒द्रम् आ व॑द वि॒श्वतो॑ नः शकुने॒
पुण्य॒म् आ व॑द ॥ २ ०४३ ०२
आ॒वद॑ंस् त्वं श॑कुने भ॒द्रम् आ व॑द तू॒ष्णीम् आसी॑नः सु॒म॒तिं चि॑किद्धि नः ।
यद् उ॒त्पत॒न् वद॑सि कर्क॒रिर् य॑था बृ॒हद् व॑देम वि॒दथे॑ सु॒वीराः॑ ॥ २ ०४३ ०३